 ISSN 2320-2025

## उपमालंकारे भामहमतिः

वापन-रुद्रदासः
शोधच्छात्रः, संस्कृतविभागः,
रामकृष्णमिशन्-विद्यामन्दिरम्

---

**भूमिका -**

मनुष्यः सुन्दरस्य उपासकः। यत्किमपि सौन्दर्यमस्माकं हृदयमाकर्षति। प्रकृतौ विद्यमानं विविधं सौन्दर्यमस्माकं चित्तं यथा विमोहयति तथैव वयमपि स्वेषां रूपसौन्दर्यमन्येषां समीपे प्रस्फुटीकर्तुमाग्रहिनो भवामः। विशेषतया विविधालंकारेण नारीणां रूपं यथा प्रकाशितं भवति, तेन प्रकारेणैव साहित्यस्य सौन्दर्यवृद्ध्यर्थं विविधालंकारस्य प्रयोजनमस्ति। लौकिकेऽलंकारः खलु शरीरभूषणम्। किन्तु काव्यतत्त्वे अलंकारशब्दस्य द्विधा व्युत्पत्तिर्भवति। प्रथमतः अलम्पूर्वकात्कृधातोः भाववाच्ये घञ्प्रत्यये निष्पन्ने सति अलंकारशब्दस्यार्थो भवति- 'अलंकृतिरलंकारः सौन्दर्यम्' इति। अर्थात् अलंक्रियते इति अलंकारः। अपरतश्च अलम्पूर्वकात्कृधातोः करणवाच्ये घञ्प्रत्यये निष्पन्नस्य अलंकारशब्दस्यार्थो हि - 'अलंक्रियते अनेनेति अलंकारः' इति। अर्थात् येन काव्यसौन्दर्यस्योत्पत्तिर्भवति। यथा उपमादयोऽलंकाराः।

भारतीयकाव्यनभसि नैकेषु आलंकारिकनक्षत्रेषु सूर्य इव देदीप्यमानः आचार्यो ह्यालंकारिकशिरोमणिः भामहाचार्यः। अस्य भामहस्य अलंकारविषयिणी आलोचना अतीव महत्वशालिनी। तेन उपस्थापिताः अलंकाराः न केवलं काव्यिकदृष्ट्या महत्वपूर्णाः, अपि च ऐतिहासिकदृष्ट्या सममेव प्रभावपूर्णाः। काव्यतात्त्विकेन भामहेन स्वकीयकाव्यालंकारग्रन्थस्य चतुःशतश्लोकानाम् एकचत्वारिंशदधिकशतकारिकासु अलंकारसम्बन्धिनी आलोचना कृता। किन्तु तत्र अलंकारस्य किमपि लक्षणं तेन न प्रदत्तम्। भामहेन तदीये ग्रन्थे काव्यसौन्दर्यस्य अपरिहार्योपादानरूपेण अलंकारः समर्थितः । यथोक्तं तेन -

"रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्॥"[1] इति

[1] काव्यालंकार, १/१३



 ISSN 2320-2025

काव्ये शब्दार्थौ तदा चमत्कारित्वं लभेते यदा तौ रूपकाद्यलंकारेण भूषितौ भवतः, यथा - सुन्दरमुखावयवविशिष्टा काचिद्रमणी भूषणहीना स्यात् चेत् कदापि सुन्दरी न भवति।

आलंकारिकचूडामणिना भामहाचार्येण वर्णितानाम् अलंकाराणां संख्या खलु अष्टात्रिंशत्। एतेषु अलंकारेषु केचन अलंकाराः पूर्वप्राप्ताः, केचन अलंकाराश्च भामहेन स्वयमेव कल्पिताः। भामहस्य कल्पनाप्रसूता एते अलंकाराः कुत्रापि तेन नोल्लिखिताः। परन्तु उदाहरणप्रदानसमये तेन स्वयमेव उद्घोषितं यत् एतानि उदाहरणानि मम। तदुक्तं तेन -

स्वयं कृतैरेव निदर्शनैरियं
मया प्रक्लृप्ता खलु वागलंकृतिः॥[2] इति।

अलंकाराणां प्रसङ्गे तेन कथितं यत् एते अलंकाराः मत्रुद्ध्या वर्णिताः। तेन वर्णितेषु अलंकारेषु द्वौ शब्दालंकारौ, षट्त्रिंशच्चार्थालंकाराः। इदानीम् एतेषु षट्त्रिंशदर्थालंकारेषु उपमालंकारस्य स्वरूपः प्रतिपाद्यतेऽस्मिन् शोधपत्रे।

**उपमालंकारः**

उपपूर्वकात् माधातोः करणे अङि टापि च उपमाशब्दो निष्पन्नो भवति। व्युत्पत्तिगतदृष्ट्या उपमाशब्दस्यार्थो भवितुमर्हति - 'उपसामीप्यं मानम् इत्युपमा' अर्थात् सादृश्यत्वात् सामीप्यत्वाच्च यन्मानं सोपमा। अत्र 'उप'शब्देन सामीप्यम्, 'मा'शब्देन तुल्यमिति अर्थद्वयमवगम्यते। अतः उपमायाः साधारणोऽर्थो हि तुल्यता, समानता, सादृश्यता चेति। अस्यामुपमायाम् अङ्गचतुष्टयं विद्यते, यथा - उपमेयः, उपमानम्, साधारणधर्मः, सादृश्यवाचकशब्दश्चेति। तत्र उपमेयो हि प्रधानो वर्णनीयो विषयः, उपमानञ्च अप्रधानम्, उपमानेन उपमेयधर्मस्य प्रकाशनात्। अनयोः उपमानोपमेययोः संगतो धर्मः साधारणधर्मः, येन उपमानेन सह उपमेयस्य तुल्यता भवति। यदुक्तं काव्यप्रकाशस्य बालबोधिनीव्याख्यायाम् - "यस्य धर्मस्य सम्बन्धात् येन सह यदुपमीयते स साधारणो धर्मः"[3] इति।

नाट्यशास्त्रकारो भरताचार्यो ह्युपमालंकारस्य आद्याचार्यः। भरतात्परं काव्यतात्त्विकेन भामहेन उपमालंकारस्य आलोचना विहिता। तल्लक्षणं दातुकामेन भामहाचार्येण निगदितम् –

'विरुद्धेनोपमानेन देशकालक्रियादिभिः।

[2] काव्यालंकार, ३/५८
[3] काव्यप्रकाश, बालबोधिनी टीका, पृष्ठ - ४४५

उपमेयस्य यत्साम्यं गुणलेशेन सोपमा॥[४] इति।

देशकालक्रियादिभिः विरुद्धेन भिन्नेन वोपमानेन सह उपमेयस्य साम्यं यदि गुणलेशेनापि दृश्यते तर्हि उपमालंकारो भवति। भामहमते उपमानोपमेययोः विरुद्धता स्यात्। एवञ्च एतयोः भिन्नजातित्वमपि उपमा भवति। 'गुणलेशेन' इत्यनेन किञ्चित्साम्येऽपि उपमा भवति। अतो भामहेन सादृश्यस्थाने 'गुणलेशेन साम्यम्' इति शब्दो व्यवहृतः।

आलंकारिकचूडामणिना भामहेन अस्या उपमायाः भेदनाय काश्चन पद्धतयः आश्रिताः। तद्यथा -

- **यथेवेत्यादिभिः शब्दैः सादृश्यम्** - अत्र भिन्नपदार्थयोः अर्थात् उपमानोपमेययोः

सादृश्यं यथा, इव चेति शब्दद्वयेन प्रकाश्यते। यथोक्तं भामहाचार्येण -

"यथेवशब्दौ सादृश्यमाहतुर्व्यतिरेकिणोः।

दूर्वाकाण्डमिव श्यामं तन्वी श्यामालता यथा"॥[५] इति।

अस्योदाहरणस्य प्रथमांशे 'दूर्वाकाण्डम्' इत्युपमानम्, 'श्यामम्' इत्युपमेयः, हरितवर्णः इति साधारणधर्मः, 'इव' इति सादृश्यवाचकशब्दः। तथा च द्वितीयांशे 'श्यामालता' इत्युपमानम्, नायिका इत्युपमेयः, 'तन्वी' इति साधारणधर्मः, 'यथा' इतौपम्यवाचिशब्दः। अस्मिन् उदाहरणे यथेवशब्दाभ्याम् उपमानोपमेययोः सादृश्यं प्रदर्शितम्। अतोऽयमुपमालंकारः।

- **समासद्वारा सादृश्यम्** - यत्र यथा इव चेति शब्दद्वयस्य प्रयोगं विहाय समासेन साम्यं दृश्यते,

तत्रापि उपमा भवति। तदुदाहरणं हि –

"विना यथेवशब्दाभ्यां समासाभिहिता परा।

यथा कमलपत्राक्षी शशाङ्कवदनेति च॥"[६] इति।

कमलपत्रे इव अक्षिणी यस्याः सा कमलपत्राक्षी। अत्र कमलपत्रमुपमानम्, अक्षि चोपमेयः। तथा च शशाङ्क इव वदनः यस्य स शशाङ्कवदन इति। अत्र शशाङ्क उपमानस्वरूपः, वदनश्चोपमेयः। अत्र सादृश्यवाचकशब्दस्य कोऽपि उल्लेखो नास्ति। यद्यत्र सादृश्यवाचकशब्दस्य प्रयोगो न स्यात्तर्हि केन प्रकारेण उपमायाः ज्ञानं सम्भवति? अस्योत्तरं

[४] काव्यालंकार, २/३०

[५] तदेव, २/३१

[६] तदेव, २/३२





हि - समासेन। तदा उपमायाः अर्थः पदार्थानां मध्ये एव वर्तते। अर्थात् अस्यामवस्थायां सादृश्यार्थः समासे अन्तर्निहितः अस्ति। तद्वत् 'कमलपत्राक्षी...' इत्युदाहरणेऽपि साम्यवाचकशब्दस्य अभावात् समासेन साम्यस्य कथनं भवति। अतोऽत्रोपमालंकारः।

- **वतिप्रत्ययेन सादृश्यम्** – येन प्रकारेण समासमाध्यमेन सादृश्यज्ञानं दर्शितम्, तथैव

वतिप्रत्ययेनापि क्रियासाम्यं भवति। यदुक्तं भामहेन -

"वतिनापि क्रियासाम्यं तद्वदेवाभिधीयते।

द्विजातिवदधीतेऽसौ गुरुवच्चानुशास्ति न॥"[७] इति।

भामहोक्ते उदाहरणेऽत्र 'तेन तुल्यं क्रिया चेद्वतिः'[८] इति सूत्रेण तुल्यक्रियां बोधयितुं वतिप्रत्ययो व्यवहृतः। अनेन वतिप्रत्ययेन उपमानोपमेययोः क्रियासाम्यमेव दृश्यते, तथा तृतीयान्तशब्दो व्यवह्रियते। 'द्विजातिना तुल्यम् अधीते' तथा 'न गुरुणा तुल्यमनुशास्ति' इत्यनयोः वाक्ययोर्मध्ये यदि तुल्यस्थाने वतिप्रत्ययः क्रियते, तर्हि 'द्विजातिवदधीते' तथा 'न गुरुवदनुशास्ति' चेति रूपं प्राप्यते। अतः तुल्यार्थे वतिप्रत्ययेन सादृश्यज्ञानं भवतीति स्पष्टम्। तस्मात् तुल्यशब्दतः यदर्थः प्राप्तः, तद्वद्वतिप्रत्ययेनापि सोऽर्थः प्राप्यते।

- **समानवस्तुन्यासेन सादृश्यम्** - यथेवशब्दौ अन्तरेणापि समानवस्तुकथनेन उपस्थापनेन वा यदि गुणसाम्यस्य प्रतीतिर्भवति, तर्हि उपमा स्यात्। ईदृशी उपमा प्रतिवस्तूपमा नाम्नाभिधीयते। यदुक्तं भामहाचार्येण -

"समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।

यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः॥"[९] इति।

भामहपरवर्तिनः आलंकारिकाः प्रतिवस्तूपमां स्वतन्त्रालंकाररूपेण अङ्कयन्ते। किन्तु प्रतिवस्तूपमा उपमाभेदरूपेति काव्यतात्त्विकस्य भामहस्य तथा दण्ड्याचार्यस्य मतिः। यत्र उपमानोपमेययो वाक्ययोः साधारणधर्मस्य सादृश्यज्ञानं भवति तत्र प्रतिवस्तूपमा। पृथक् निर्दिश्यते सा प्रतिवस्तूपमा। उपमालंकारे साधारणधर्मेणैकेन साम्यं स्फुटम्। किन्तु प्रतिवस्तूपमायां दृश्यते यत् स्वतन्त्रवाक्यद्वयं तथा वाक्यद्वये साधारणधर्मोऽपि पृथक्। अत्र

[७] काव्यालंकार, २/३३

[८] अष्टाध्यायी, ५/१/११५

[९] तदेव, २/३४

सादृश्यवाचकः शब्दोऽपि न दृष्टः। तर्हि अलंकारेऽस्मिन् सादृश्यस्य बोधः कथं जायते? समाधत्ते भामहेन -

"साधुसाधारणत्वादिर्गुणोऽत्र व्यतिरिच्यते।

स साम्यमापादयति विरोधेऽपि तयोर्यथा॥"[10] इति।

प्रतिवस्तूपमायाम् उपमानोपमेययोः साधुता साधारणत्वादिगुणश्च भिन्नः। अतः उपमेयोपमानरूपेणोपस्थापितयोः वस्तोः गुणधर्मौ भिन्नतया प्रतिपादितौ स्याताम्। अत्र भामहस्य वचनं यत् तयोः विरोधे सति गुणसाम्यमस्त्येव । तदुदाहरणं तावत् -

"कियन्तः सन्ति गुणिनः साधुसाधारणाश्रियः।

स्वादुपाकफलानम्राः कियन्तो वाऽध्वशाखिनः॥"[11] इति।

कियन्तः गुणिनः सन्ति ये स्वकीयां सम्पदम् अन्यैः पुरुषैः सह उपभोगं कुर्वन्ति। कियन्तश्चा अध्वतरवः सन्ति, यत्र सुस्वादुपक्वफलानि सन्ति। अत्र वाक्यद्वये भिन्नस्य वस्तोरुपस्थापनं भवति। अस्मिन् उदाहरणे गुणीव्यक्तिः उपमेयः, फलशाली वृक्षः उपमानम्। उभयोर्धर्मोऽत्र भिन्नः। गुणीजनस्य धर्मः साधुसाधारणाश्रित्वम्, वृक्षस्य धर्मः स्वादुपाकफलानम्रता। उभयोः पृथकत्वे सत्येऽपि साम्यमप्यत्र विराजमानम्। तत्तु विरलता, रूपः गुणश्च। उभयत्र गुणसाम्यस्य प्रतीत्या तयोः उपमानोपमेययोः भावसम्बन्धः उपस्थाप्यते। अतः द्वयोः भिन्नगुणधर्मविशिष्टवस्त्वो या उपमा प्रकाश्यते सा प्रतिवस्तूपमा। यतः तत्र प्राकृतिकसाम्यमुभयोः दृष्टम्।

भामहस्य प्राग्वर्तिनः समसामयिकाः आलंकारिकाः निन्दोपमा प्रशंसोपमा आचिख्यासोपमा इति उपमायाः भेदत्रयम्[12] अपितु मालोपमादि[13] इति कश्चन भेदमपि प्रतिपादितवन्तः।किन्तु भामहाचार्यः एतान् भेदान् नाङ्गीकृतवान्। तन्मते उपमानोपमेयगतं गुणसाम्यमेव उपमायाः विषयः। अनेन गुणसाम्येन स्वभावतः निन्दोपमा प्रशंसोपमा आचिख्यासोपमा च प्रतिपादिता। अतः उपमेयस्थैः गुणैः उपमानस्थानां गुणानां सादृश्यं उपमा चेत् निन्दोपमादीनां स्वीकारे किमपि प्रयोजनं नास्ति, तेषां स्वतन्त्रवैशिष्ट्याभावात्।

## मूल्यायनम्

उपमा जनप्रियोऽलंकारः। अस्य उपमालंकारस्य प्राधान्यविषये नैके आलंकारिकाः अतीव सुन्दरं सुन्दरं मन्तव्यं कृतवन्तः। यथा राजशेखरेण-

[10] काव्यालंकारः, २/३५

[11] तत्रैव, २/३६

[12] तत्रैव, २/३७

[13] तत्रैव, २/३८





"अलंकारशिरोरत्नं सर्वस्वं काव्यसम्पदम्।

उपमा कविवंशस्य मातैवेति मतिर्मम॥" इति ।

महिमभट्टेनापि निगदितं –

"सर्वेष्वलंकारेषूपमा जीवितायते।" इति ।

अपि च चित्रमीमांसाकारेण अप्पयदीक्षितेन भणितम् -

"उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।

रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥" इति।

आभरताद् जगन्नाथं यावत् सर्वे आलङ्कारिकाः उपमाम् आलोचितवन्तः।उपमाविषये भामहस्य अभिनवत्वं दरीदृश्यते। उपमाविषये भामहस्य व्यक्तव्यो हि - देशकालक्रियास्वरूपादीनां भिन्नतावशाद् उपमेयोपमानयोः किञ्चित्साम्ये सत्यपि उपमालंकारो भवति। तत्कारणं हि पदार्थद्वयस्य मध्ये सर्वांशस्य साम्यं कदापि भवितुं नार्हति। अतएव पदार्थद्वये किञ्चित्साम्ये प्रतीयमाने सत्यपि उपमालंकारस्योदयो भवति। । तेन श्रौती आर्थी चेति उपमाया भेदद्वयमुक्तम्। तन्मते यत्र सादृश्यवाचकशब्दस्य प्रयोगोऽस्ति तत्र श्रौती उपमा। यत्र सादृश्यवाचकानाम् इवादीनां प्रयोगो नास्ति किन्तु अर्थतः सादृश्यज्ञानं भवति तत्र आर्थी उपमा। यत्र दण्डिमम्मटविश्वनाथाचार्याः यथाक्रमेण द्वात्रिंशत्प्रकारान् पञ्चविंशतिप्रकारान् सप्तविंशतिप्रकारान् उपमाया भेदान् उल्लिखितवन्तस्तत्र भामहाचार्यः केवलं भेदद्वयं दर्शितवान् इति शम्।

**सहायकग्रन्था:**


१. भामह, *काव्यालंकार*, सम्पा. देवेन्द्रनाथ शर्मा, पाटना; विहार राष्ट्रभाषा परिषद्,१९८५

२. भामह, *काव्यालंकार*, सम्पा. पि.नि. नागनाथ शास्त्री, दिल्ली; मोतिलाल बनारसीदास पाब्लिशार्स, १९९१

३. भामह, *काव्यालंकार*, सम्पा. रामानन्द शर्मा, वाराणसी; चौखम्बा संस्कृत सीरीज आफिस्, २०१३

४. भामह, *काव्यालंकार*, सम्पा. बटुकनाथ शर्मा, वाराणसी; चौखम्बा सम्स्कृत भवन्, २०१६

५. मम्मट:, *काव्यप्रकाश:* (५म खण्ड:), सम्पा. ड: ज्योत्स्ना मोहन, दिल्ली; नाग पाब्लिशार्स, १९९९

६. मम्मट:, *काव्यप्रकाश:* (बालबोधिन्याख्यटीका), सम्पा. झलकीकर:, दिल्ली; परिमल पाब्लिकेशन्स, २००८

७. मम्मट, *काव्यप्रकाश* (नवम-दशमोल्लास), सम्पा. विजया गोस्वामी, कलकाता; संदेश, २००७

८. वामन, *काव्यालंकारसूत्रवृत्ति*, सम्पा. डँ. ब्रह्मानन्द त्रिपाठी, वाराणसी; चौखम्बा सुरभारती प्रकाशन, २०१०

९. वन्दोपाध्याय, धीरेन्द्रनाथ, *संस्कृत अलंकार शास्त्र तत्व ओ समीक्षा*, कलकाता; पश्चिमवङ्ग राज्य पुस्तक पर्षत्,२०१२

१०. पाल, विपदभञ्जन, *अलंकार चिन्तिता*, कलकाता; संदेश, १४१४



Bapan Ruidas

Ph.D Scholar, Department of Sanskrit,

Ramakrishna Mission Vidyamandira

Email: sanskrit.bapan@gmail.com

Mob: - 9593322276






# न्याय-व्याकरणयो: शक्तिविचार:


*डा. गिरिधारी पण्डा*

*सहायकाचार्य: विभागाध्यक्षश्च*

*स्नातकोत्तरसंस्कृतविभाग:*

*मिदनापुरमहाविद्यालय:(स्वयंशासित:)*

*मिदनापुरम् , पश्चिमबङ्ग:-९८०००४५२५०*


'शब्देष्वेवाश्रिता शक्ति: विश्वस्यास्य निबन्धनी'[1] (वा.प. -१-११८ ) इत्युक्त्यनुसारेण प्रायोगिकशब्दस्य या शक्तिर्विद्यते , सा शक्ति: विश्वस्य निबन्धने जातीयसंहतौ च सहायिका भवति ।येन 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्'[2] इति श्रुतिवचनस्य प्रामाण्यमुपजायते ।यदधिकृत्य 'वागेवविश्वा भूवनानि यज्ञे' इति श्रुतिवचनं संगच्छते। यतो हि शब्देन एव जगदिदं गतिशीलम् , सर्वमपि ज्ञानं शब्देनैव अवभासते । यदुक्तं हरिणा —

"न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।"

शब्देनैवार्थस्यावबोधनत्वात् शब्दस्य शक्ति: सर्वजनग्राह्या। भाष्यकार: तदीये महाभाष्ये शब्दस्य लक्षणद्वयं निरूपितवान्। तद्यथा – १) 'येनोच्चारितेन शब्देन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्यतो भवति स शब्द:'[3]। २) 'प्रतीतपदार्थको लोके ध्वनि: शब्द इत्युच्यते'[4] । 'प्रतीतपदार्थको लोके ध्वनि: शब्द'[5] – इति द्वितीयलक्षणस्य व्याख्याने उद्योतटीकायां नागेशेनोक्तं यत् – 'लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्ध: श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्द:'[6] इत्यर्थ:। पुन: 'तपरस्तत्कालस्ये'[7]ति सूत्रे भाष्ये तु ध्वनिस्फोटयोर्भेद: निरूपित: ।यदुक्तं तत्र – 'स्फोट: शब्द: , ध्वनि: शब्दगुण:'[8] । शब्दस्य अनेकविधा परिभाषा,अर्थस्यापि अनेकविधं प्रतिपादनम् ।किन्त्विदं निश्चवचं यत् भाषानिबन्धने उभययो: याथार्थ्यमनस्वीकीर्यम् ।एतदेव तथ्यं प्रतिपाद्य कविकूलगुरुणा महाकविना कालिदासेनोक्तम्-

' वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगत: पितरौ बन्दे पार्वती-परमेश्वरौ।।'[9]

वाक् च अर्थश्चेति वागर्थौ। अत्र वाक् नाम शब्द:। अर्थस्तु तदधिकृत्य बर्त्तते।

तत्र अर्थस्य प्रतिप्रत्तिः शब्देनैव विधीयते ।यदुक्तं हरिणा 'पदार्थजातयः सर्वाः शब्दाकृतिनिबन्धना:'[10] । यत् तथ्यं स्वीकृत्य 'शब्दार्थौ सहितौ काव्यम् '[11] (काव्यालङ्कारः – १.१६) , 'शरीरं तावदिष्टार्थं व्यवच्छिन्ना पदावली काव्यम्'[12] (काव्यादर्शः – १.१०), 'काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्त्तते .... '[13] (का. सू. – १.१.१) 'शब्दार्थौ काव्यम्'[14] (काव्यलंकारे रुद्रटः – २.१) इत्यादीनि काव्यलक्षणानि सङ्गच्छन्ते ।तथ्यमिदं प्रतिपाद्य उक्तमपि भर्त्तृहरिणा - 'अर्थप्रबृत्तितत्त्वानां शब्दा एव निबन्धनम्'[15] 'शब्देनैव अर्थापगुढः जायते' इति तत् तात्पर्यम्। अतः 'शाब्दबोधं प्रति शक्तिग्रहमेव कारणम्' इति धिया शब्दस्य शक्तिः सर्वैः शास्त्रकारैः स्वीक्रियते । यदुक्तं नागेशेन परमलघुमञ्जुषायां – 'तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरुपितवृत्तिविशिष्टज्ञानं हेतुः'[16] ।संक्षेपेणात्रायं भावः यत् -यद्धर्मावच्छिन्नविषयकशाब्दबोध अपेक्षितः तद्धर्मावच्छिन्ननिरुपितवृत्तिविशिष्टज्ञानं हेतुः। तत्र गृहीतशक्तिकात् पदात् शाब्दवोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दवोधस्यादर्शनात् शाब्दवोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते । येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्निभवति । तस्याः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः । शाब्दवोधे कारणत्वेन अपेक्षिता एषा वृत्तिः - 'शक्तिः लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते । काव्यमार्गे शब्दस्य त्रैविध्यं शक्तित्वं स्वीक्रीयते – वाचकः, लाक्षणिकः, व्यञ्जकञ्च । तत्र 'शक्तिः इति कः पदार्थः' इति विवेचनावसरे शास्त्रकारेषु वैमत्यं परिलक्ष्यते । मुख्यतः विषयेऽस्मिन् वैयाकरण-नैयायिकयोः विवादः समधिकः । प्राचीननैयायिकाः ईश्वरेच्छारूपां शक्तिं स्वीकुर्वन्ति । नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते । वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । भट्टोजिदीक्षित-कौण्डभट्टादीनां मते वोधजनकत्वम् एव शक्तिः । नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति । तन्मध्ये वाच्यवाचकभावापरपर्याया एव शक्तिः । भर्त्तृहरिरपि शब्दस्य नित्यतामङ्गीकृत्य सम्बन्धस्य धर्मः 'शक्तीनामप्यसौ शक्तिः'[17] (वा. प. – ३.३.६) इति वचनेन पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरीत । तन्मते वोधरूपं कार्यं दृष्ट्वा शब्दनिष्ठा शक्तिरनुमीयते ।यथोक्तं तेन –





उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।

शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः।।'[18]

तत्सम्बन्धत्वं पदनिष्ठत्वं वाक्यनिष्ठत्वञ्च । वैयाकरणानां मते सः वाच्यवाचकभावरूपः सम्बन्धः वाक्ये वर्त्तते । अन्येषां मते तु पदे वर्त्तते । नैयायिकाः केवलं साधुषु शब्देषु शक्तिं स्वीकुर्वन्ति । अपभ्रंशेषु शक्तिं न स्वीकुर्वन्ति । शाब्दिकाः 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः '[19] (म.भा. पस्पशा) इति भाष्यवचनमाधारीकृत्य साधुशब्दा इव असाधुशब्देष्वपि शक्तिं स्वीकुर्वन्ति । भर्त्तृहरिः 'वाचकत्वावशेषेऽपि नियमः पुण्यपापयोः'[20] (वा. प. – ३.३.३०) इति कारिकामाध्यमेन असाधुशब्देषु अपभ्रंशेषु वा शक्तित्वमङ्गीकरोति। मीमांसाशास्त्रे आर्यम्लेच्छाधिकरणस्य सङ्गतत्वात् मीमांसकाः अपि अपभ्रंशेषु शक्तिं स्वीकुर्वन्ति इति नागेशः तदीये व्याख्याने लघुमञ्जुषायां परमलघुमञ्जुषायां च प्रतिपादयति । इश्वरेच्छा शक्तिरिति तार्किकाः । सा चेच्छा द्विविधा पदप्रकारकार्थविशेषिका अर्थप्रकारकार्थविशेषिका चेति । तार्किकैः शक्तेः स्वरूपद्वयमङ्गीकुर्वन्ति । अस्माच्छब्दादयमर्यथो बोधव्यः इत्याकारा इदं पदमिमर्थं वोधयतु इत्याकारा ईश्वरेच्छा शक्तिः । तत्र प्रथमस्वरूपे अस्मात् घटादिपदात् । अयं जात्याकृतिविशिष्टव्यक्तिरूपः कम्बुग्रीवादिमान् पदार्थः वोधव्यः इदमभिन्नशब्दनिरूपितजन्यतावद् वोधनिरूपितविषयतावानर्थ इत्याकारिका शब्बप्रकारिका अर्थविशेष्यिका ईश्वरेच्छा शक्तिः सिद्धयति । द्वितीयस्वरूपे—

इदमर्थनिष्ठाविषयतानिरूपकबोधनिष्ठजन्यतानिरूपितजनकतावत्पदमित्यर्थप्रकारकविशेषिकाईच्छा शक्तिः । एतेषां नये लौकिकेच्छायाः बाहुल्येन ईश्वरेच्छाया एव शक्तित्वकल्पने लाघवः भवति । स एव ईश्वरेच्छारूपसम्बन्धः पदपदार्थोरिति आशयः । तन्मते यदि एव शक्तिग्रहः तु वाक्ये । शक्तिग्रहजिज्ञासुः बालः प्रयोज्यप्रयोजकव्यवहारं दृष्ट्वा प्रथमं वाक्ये एव शक्तिग्रहं करोति । यथा प्रयोजकेन प्रयुक्तं घटमानय इति वाक्यं श्रुत्वा घटकर्मकमानयनं प्रेरणाविषयः इत्यर्थं जानाति। पुनः घटपदं परित्यज्य पटपदं प्रक्षिप्य पटमानय इति प्रयोयकोच्चारितं वाक्यं श्रुत्वा पटानयने प्रवृत्तं प्रयोज्यं दृष्ट्वा तत्र परपदस्य शक्तिग्रङं करोति । अनेन रूपेण सर्वेषु पदेषु शक्तिग्रहो जायते इति तद्भावः ।

वैयाकरणाः मतमिदं न स्वीकुर्वन्ति एतेषां नये तार्किकोक्तमीश्वरेच्छायाः शक्तित्वं न समीचनीम् । यतो हि यदा ईच्छायाः सम्बन्धत्वं , सिद्धयेत् तदैव तस्याः शक्तेः शक्तित्वं स्यात् । यो हि आधाराधेयभावनियामकत्वेन दृष्टः स एव सम्बन्धः । प्रकृते च ईच्छीयविषयताश्रयवोधनिष्ठजन्यतानिरूपितजनकतारण्यविषयतासम्बन्धेन अयमर्थः इच्छावान् ।

अयं शब्दो वा इच्छावान् इति व्यवहारस्य अदर्शनात् इच्छायाः सम्बन्धत्वाभावः । नागेशः परमलघुमञ्जुषायां वोधजनकत्वमपि शक्तिः इति दीक्षितादीनां मतमपि न स्वीकरोति । तन्मते वोधजनकत्वमपि न शक्तिः , तस्यापि उभयवृत्तित्वाभावः । प्रसङ्गे अस्मिन् सम्बन्धस्य लक्षणमुच्यते यत् – सम्बन्धो सम्वन्धिद्वयभिन्नत्वे सति , द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः । अत्र सम्वन्धलक्षणे अंशत्रयं तत्र द्विष्ठः सम्बन्धः इति भर्तृहरेः सिद्धान्तः । अत्र सम्बन्धघटकेन प्रथमांशेन अभेदस्य सम्बन्धत्वनिरासः , द्वितीयांशेन केवलजन्यत्वादेः सम्बन्धत्वनिरासः , तृतीयांशेन च वृत्तनियामकविषयकत्वादीनां सम्बन्धत्वनिरासाः । एवमेव इच्छाया अपि सम्बन्धनिरास इति वोधम् । अतः नागेशमतानुसारेण – पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः । सा शक्तिः वाच्यवाचकभावापरपर्याया । अत्र वाच्यवाच्यकत्वे अखण्डपदार्थरूपमेव वोध्यम् । न तु वाच्यं वाच्यकत्वं वा । बोधविषयकत्वं बोधजनकत्वमिति सखण्डम् । अयञ्च वाच्यवाचकभावः शब्दार्थयोर्भयनिष्ठः ।

वस्तुतस्तु शब्दः नित्यः , अर्थः नित्यः , शब्दस्य शक्तिः बुद्धिविषयः । तादात्म्यसम्बन्धेन एव भेदाभेदः आरोपितः । येन शब्दार्थयोः तादात्म्यस्वीकारे मधुशब्दोच्चारणेन मुखे माधुर्यरसत्वापत्तिः अथवा वह्निशब्दोच्चारणे मुखे दाहापत्तिः इत्यादयः आशङ्काः न जायन्ते ।भर्तृहरिरपि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरीत ।यथेक्तं तेन -

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः।।’[21]

यत्र शब्दे उपकारस्वभावः सम्बन्धोऽस्ति तत्र शब्दे धर्मः शक्तिर्वा अनुमीयते

अतः शाब्दवोधे कारणरूपा बुद्धिरूपा शक्तिः बुद्धिर्निग्राह्या स्फोटरूपा च । सा शक्तिः तादात्म्यसम्बन्धेन वाच्यवाचकरूपा । स्फोटात्मकं पदमिव शक्यार्थोअपि बुद्धिसत्तासमाविष्ट एव , न तु वाह्यसत्ता आविष्टः इति वैयाकरणानामाशयः । न्यायसूत्रकारः गौतम अपि असत एवोत्पत्तिकर्तृकत्वं कथामित्याशङ्क्य सूत्रितवान् बुद्धिसिद्धन्तु तदसत्[२२] (न्या. सू. - ४.१.५०)इति । तत्कार्यमुत्पत्तेः प्राक् नागेशोक्तरं चासदपि वुद्धिविषयतया सिद्धमिति तदर्थः । जन्माद्यस्य यतः[२३] (ब्र.सू. – १.१.२) इति सूत्रे वाचस्पतिमिश्रेणापि उक्तम् - चेतनो हि नामरूपे बुद्धावालिख्य घट इति नाम्ना कम्बुग्रीवादीना रूपेण च वाह्यं घटं निष्पादयति[२४] । स्मृतिष्वपि उक्तम्- विप्र- पृथ्वादि चित्तस्थं न बहिस्थं कदाचन । भर्तृहरिणा उक्तमपि —

यो वार्थो बुद्धिविषयो वाह्यवस्तुनिबन्धनः ।





स वाह्यं वस्त्विति ज्ञातः शब्दार्थः सम्यगिष्यते ।।

अत एव वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति, अथवा वाच्यवाचकभावापरपर्याया एव शक्तिरिति स्वीकारेण न काचित् विप्रतिपत्तिरिति वैयाकरणानामाशयः।

पादटीका:-

1. वा.प. – १.११८
2. ऋ.वे.-१०.९१.२-४
3. म.भा. पस्पशा.
4. तत्रैव
5. तत्रैव
6. म.भा.-उद्योत.
7. पा. सू. – १.१.३०
8. म.भा. १.१.३०
9. रघुवंशम् – १.१
10. वा. प. ब्रह्मकाण्डम्
11. काव्यालंकारः – १.१६
12. काव्यादर्शः – १.१०
13. काव्यलंकारसूत्रम् – १.१.१
14. काव्यलंकारे रुद्रटः – २.१
15. वा. प. १-१३
16. परमलघुमञ्जुषा
17. वाक्यपदीयम् – ३.३.६
18. तत्रैव
19. महाभाष्यम् पस्पशा --
20. वाक्यपदीयम् – ३.३.३०
21. तत्रैव
22. न्या. सू. - ४.१.५०
23. ब्र.सू. – १.१.२
24. तत्रैव

**सहयकग्रन्थसूची :**


१. वैयाकरणभूषणसारः, दर्पण-प्रभासमेतः, चौखम्वा-संस्कृत-सीरीज-अफिस, भारनसी, १९६९
२. वैयाकरणसिद्धान्तकौमुदी, मोतीलाल बनारसी-दास दिल्ली, २०००
३. वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्जिका-कलासम्वलिता चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९८५
४. व्याकरणदर्शनेर इतिहास, गुरुपदहालदारः, कोलकाता १३५० वङ्गाब्दः।
५. शव्दशक्तिप्रकाशिका, चौखम्वा-संस्कृत-सीरीज, वारणसी, १९३५
६. प्रकरणपञ्चिका, शालिकनाथः, वेनारस-हिन्दु-युनिभार्सिटि, वारानसी, १९६१
७. प्रौढ़मनोरमा, शव्दरत्न-भैरवी-भावप्रकाश टीका सम्वलिता, चौखम्वा-संस्कृत-सीरीज, भारानसी।
८. महाभाष्यम्, प. दधिरामशर्मा, चौखम्वा-सुरभारती-प्रकाशनम्, वारणसी, १९८८
९. मानमेयेदयः, श्रीदीननाथत्रिपाठिनवर्तीर्थः, संस्कृत कलेज, कोलकाता, १९९०
१०. वाक्यपदीयम्, सम्पूर्णनन्द-संस्कृत-विश्वविद्यालयः, वारणसी, १९९८
११. न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीशः, पश्चिमवङ्ग-राजक-पुस्तक-पर्षद्, कोलकाता, १९८३
१२. न्यायसिद्धान्तमुक्तावली, किरणबलीटीकोपेता, प.श्रीकृष्ण-वल्लभाचार्य्यः चौखम्वा-संस्कृत-संस्थानम्, वारणसी, वि.सं-२०६३
१३) अष्टाध्यायी, ड. तपनशङ्करभट्टाचार्य्यः, संस्कृत-बुक-डिपो, कोलकाता, २००४
१४) आख्यातवादः, प्रवालकुमार सेनः, संस्कृतपुस्तक भान्डारः, कोलकाता, १९७९
१५) काशिका, ड. जयशङ्करलालत्रिपाठी, ड. सुधाकरमालवीयः, तारा-बुक्-एजेन्सी, वारनसी, १९८६
१६) तत्त्वचिन्तामणिः, कामाख्यानाथतर्कवागीशः चौखम्वा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९९०
१७) न्यायदर्शनम् – गौतमप्रणीतम, वात्स्यायनभाष्यसहितम्, चौखम्वा-संस्कृततसीरीज वाराणसी।






# कोरोनापरिस्थितौ आयुर्वेदचिकित्साविमर्शः


ड.शुभ्रजित् सेनः,
सहायकाध्यापकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा
तथा च
आशिषविश्वासः
अतिथिशिक्षकः, सम्कृतविभागः, नाथाइनालमूर्मु-मेमोरियाल्-कलेज्,
दक्षिणदिनाजपुरम्


..........................................................................................................

..........................

चरकसंहितायाः विमानस्थाननामके तृतीये अध्याये सहस्त्रवर्षेभ्यः पूर्वं एतादृशमहामारीणाम् उल्लेखः प्राप्यते, यस्य 'जनपदोद्ध्वंसः'[1] नाम प्रदत्तमस्ति। अग्निवेषतन्त्राधारितचरकसंहितानुसारम् एतादृशं तदा भवति, यदा कस्यचित् राज्यस्य प्रमुखाः जनाश्च अनीतिपूर्वकं व्यवहरन्ति। यदा ते अनीतिपूर्वकं व्यवहरन्ति, तदा तेषाम् अधीनाः कर्मचारिणः अपि तथैव व्यवहरन्ति। यदा अनैतिकता एषा चरमं प्राप्नोति, तदा प्रकृतिः असंतुलिता भूत्वा भूमिं जलं वायुं कालं च दूषयति। एवं यदा एतानि तत्त्वानि दुष्टानि भवन्ति, तदा यो हि मनुष्यः पृथक्तया प्रकृतिः, आयुः, सात्म्यं, मनोबलं, शरीरबलं, अग्निबलं, रोगनिरोधकशक्तिं च धरन्नपि एकेनैव व्याधिना पीडितो भूत्वा महता प्रमाणेन मृत्युं प्राप्नोति। अत्र अनेन प्रकारेण अधर्मम् अनैतिकतां च एतादृग्-महारोगस्य मूलकारणम् उक्तमस्ति।

आयुर्वेदशास्त्रस्य स्वकीयं विज्ञानम् अस्ति। तस्य ज्ञानं विना वयं स्वास्थ्यस्य आदर्शलक्ष्यं प्राप्तुं न शक्नुमः। कोविड-19-महारोगः आयुर्वेदाय एकम् अवसररूपमस्ति। अयं स एव कालः यस्मिन् विश्वम् अस्मान् श्रोतुम् अवगन्तुं सिद्धम् अस्ति। लोकाः तिक्तं पेयं पातुं तत्पराः सन्ति, पिबन्ति आग्रहपूर्वकं तदिच्छन्ति च। अयं

---

[1] तद्यथा - यदा वै देशनगरनिगमजनप्रधाना...... त उद्ध्वस्ता जनपदाः स्पृश्याभ्यवहार्यदोषात् । -(*चरकसंहिता*, विमानस्थानम्, 3/20)

2. *चरकसंहिता* (विमानस्थानम् ,3/1-4)

3. *सुश्रुतसंहिता* (6/19)

कालः अस्ति, यदा एतस्य मौलिकवैज्ञानिकस्वरूपं विश्वाय बोधयितुम् आवश्यकम् अस्ति। ये आयुर्वेदं परम्परागतज्ञानरूपेण अवगच्छन्ति, ते इदानीं स्वज्ञानं किंचित् विस्तरेयुः।

कोरोनासदृशो महामारी अस्माकं कृते न तु नूतनः, अयञ्च रोगः खलु आयुर्वेदे प्रतिपादितः। चरकसंहितायां जनपदोद्ध्वंसनामकः एकः अध्यायः एव तदर्थं व्याख्यातः[2]। सुश्रुतसंहितायां तु ताः मरकशब्देन प्रतिपादिताः[3] । वाय्वादीनां दूषणेन विना अपि रक्षोगणादिभिः भूतसङ्घातैर्जनपदानाम् उद्ध्वंसो भवतीति कथितम्। तदुक्तम् - "रक्षोगणादिभिर्वा विविधैर्भूतसङ्घैस्तमधर्ममन्यद्वाऽप्यपचारान्तरमुपलभ्याभिहन्यन्ते" इति । अत्र 'रक्षोगणाः भूतसङ्घाः' इत्यनेन वैराण्वादयः सूक्ष्माणुजीविनः उद्दिष्टाः। तथाहि टीकायां चक्रपाणिना उक्तम् , "अधर्मकारणमशौचादीत्यर्थः' इति । वैराण्वादीनां संक्रामणम् अपि अशौचादेव भवतीति । आचार्यचरकनिर्दिष्टेन अनेन **सान्निपातिकज्वरेण 'कोविड 19'** इत्यस्य अधिकं **साम्यं** दृश्यते । सर्वे सान्निपातिकज्वराः कष्टपूर्वकमेव दूरीभवन्ति । दोषवृद्धे सति, अग्नौ पूर्णतया नष्टे सति, सान्निपातिकज्वरे पूर्णलक्षणयुते सति च सः असाध्य एव कथितः।

'कोविड-19' इत्यस्य लक्षणस्वरूपसाम्ये ज्वरप्रतिश्याय-श्वास-ग्रहणीरोगाणाम् आयुर्वेदीयानि चिकित्सासूत्राणि उपयोगीनि भवितुं शक्नुवन्ति। चिकित्साकार्यम् आयुर्वेदचिकित्सकस्य निर्देशने एव करणीयम्, यतो हि प्रत्येकमपि जनस्य प्रकृतिः, आयुः, अग्निबलं, शरीरबलं, मनोबलं, रोगबलं, सात्म्यं, कालः, दोषस्थितिः चेत्यादयो भिन्नाः भवन्ति। आचार्यचरकेण ज्वररोगार्थं ये निर्देशाः प्रदत्ताः, तेषु ज्वरारम्भे लङ्घनस्य प्रयोगः निर्दिष्टः। साधारणतया अस्य समाधाने पञ्चषाणि दिनानि आवश्यकानि भवन्ति । तथापि पूर्णरूपेण स्वस्थो भवितुं **चतुर्दशदिनानि** आवश्यकानि भवन्ति।

---





आयुर्वेदे रसादीनां धातूनां (रसरक्तमांसमेदास्थिमज्जाशुक्राणाम्) परमसार एव ओजः इत्युच्यते । एतद् ओजः एव बलम् इति कथ्यते। अस्य ओजसः अभावे क्षीणतायां वा शरीराणि क्षीयन्ते नश्यन्ति वा। इदम् ओजः आघातेन, धातुक्षयेण, क्रोधेन, शोकेन, अतिध्यानेन, अतिपरिश्रमेण, अतिबुभुक्षया च क्षीयते। अतः रोगनिरोधकशक्तेः विकासार्थम् एतेषु विषयेषु अवधानम् अत्यावश्यकं वर्तते ।

दोषोपशमनोपायानां लङ्घनेन सह स्वेदनप्रयोगेण यवागुतिक्तरसप्रयोगाभ्यां च उत्पन्नो नवीनज्वरः क्षीणदोषो भवति। आचार्यः **भावमिश्रः** ज्वरचिकित्सोपायमुल्लिखितवान् यत् ज्वरारम्भे लङ्घन-प्रयोगः, ज्वरस्य मध्यकाले पाचनप्रयोगः, ज्वरान्ते औषधप्रयोगः, ज्वरमुक्तेः परं च विरेचनपूर्वकशोधनं करणीयम्। लङ्घनप्रयोगाज्जठराग्निः प्रदीप्तो भवति, ज्वरो नश्यति, शरीरे लघुता जायते, दोषक्षयः भवति, बुभुक्षा च जायते । **योगरत्नाकरकारः** लङ्घनलाभप्रसङ्गे उल्लिखितवान् यत् नेत्ररोगः, उदररोगः, प्रतिश्यायः, व्रणः, ज्वरः चेति पञ्चसु रोगेषु पञ्चानां रात्रीणां लङ्घनेन इमे रोगाः नश्यन्ति। बलहानिः यावता न भवेत्, तावदेव लङ्घनं करणीयम्। लङ्घनस्य अयम् आशयः नास्ति यत् निराहारेण एवभवितव्यम् इति, अपितु येन केनापि शरीरे लघुत्वम् उत्पद्यते, तदेव लङ्घनं कथ्यते। संशोधनं, पिपासा, वायुसेवनम्, आतपसेवनं, पाचनौषधद्रव्यप्रयोगः, उपवासः, व्यायामश्च इत्येतानि लङ्घनम् इति कथ्यते। **आचार्यसुश्रुतः** प्रतिश्यायस्य औषधोपायं कथयन् पीनसे पूतिनस्ये च सर्वप्रथमं स्नेहनस्वेदनाभ्यां परं वमन-विरेचनार्थं निर्दिष्टवान्। तेन तीक्ष्णं, लघु अल्पं च भोजनं कर्तुम्, सर्वदा उष्णजलस्य सेवनं कर्तुं, भोजनानन्तरं योग्ये काले औषधीयं धूम्रपानं च प्रयोक्तुं निर्दिष्टम् ।

आचार्य**चरकः** श्वासरोगस्य चिकित्सासूत्रं सूत्रयन् हिक्कायां श्वासरोगे च सर्वप्रथमं सैन्धवलवणेन तिलतैलेन च वक्षसि मर्दनं कृत्वा स्वेदनं कर्तुं निर्देशं प्रदत्तवान्। अनया प्रक्रियया ग्रथितः कफः द्रवीभूय स्रोतःसु विलीयते, येन स्रोतसां छिद्राणि मृदूनि जायन्ते, एवञ्च वातानुलोमतया श्वासः सम्यक्तया समायाति

आचार्यः **चरको** ग्रहणीरोगस्य चिकित्सासूत्रं कथयति यत् यदि आमदोषः उदरे लीनः भवेत् अथवा पक्वाशये विद्यमानः भवेत् तर्हि अग्निप्रदीपकानां विरेचनकारकाणाम् औषधयोगानां प्रयोगं कृत्वा स बहिः निष्कासनीयः। यदि आमदोषयुक्तः रसः शरीरे व्याप्तो भवेत् तर्हि एतस्यां स्थितौ रोगिणा लङ्घनेन पाचनौषधिभिश्च आमदोषो जेतव्यः।

आचार्येण **चरकेण** उष्णजलं ज्वरे औषधत्वेन प्रयुक्तं तथा च उष्णजलस्य गुणवत्तां प्रतिपादयन् चरकः अकथयत् यत् उष्णजलं दीपकं, पाचकं, ज्वरनाशकं, स्रोतःशोधकं, बलप्रदायकं, भोजने रुच्युत्पादकं स्वेदकम् अत्यन्तं कल्याणकारकं च भवति। तथाह्युक्तम्-

दीपनं पाचनं चैव ज्वरघ्नमुभयं हि तत्।
स्रोतसां शोधनं बल्यं रुचिस्वेदकरं शिवम्॥(*चरकचिकित्सा*, 3/144)

**हारीतसंहितायाम्** आरोग्यजलस्य उल्लेखः कृतो वर्तते। जलस्य क्वथने कृते यदा तस्य चतुर्थांशः अवशिष्यते, तज्जलम् आरोग्यजलमित्युच्यते। एतज्जलं श्वासकासनाशकं, मेदकफहारकं च भवति। अनेन जलेन प्रतिश्यायः, शूलः, उदरवायुः, अर्शः, पाण्डुः, शोथः, उदररोगाश्च नश्यन्ति। रात्रौ अस्य जलस्य पानेन अजीर्णरोगो नष्टो भवति[4]। इत्थं वयं पश्यामः यत् एतावन्तः औषधीयगुणाः ये महस्रेभ्यः वर्षेभ्यः प्राक् ऋषिभिः मानवहिताय प्रयुक्ताः तद्विज्ञानं पारम्परिकज्ञानं विज्ञाप्य तस्य उपेक्षया सरलस्वास्थ्यस्य उपायैश्च मानवता दीर्घकालं यावत् वञ्चिता। कोविडेत्यस्यां दशायां सकलविश्वे उपयोगे सति एतदत्यन्तम् उपयोगि सिद्धं जातम्।

[4] पादशेषन्तु क्वथितं तज्ज्ञारोग्यजलं विदुः।
कासश्वासहरं पथ्यं मान्द्यं चापकर्षति॥
सद्यो ज्वरं हरत्याशु मेदः कफनाशनम्।
प्रतिश्यायं पाचयति शूलगुल्मार्शनाशनम्॥
दीपनश्च कृनाशश्च पाण्डुशोफोदरापहम्।
अजीर्णश्च जरत्याशु पीतमुष्णोदकं निशि। (*हारीतसंहिता*, प्रथमस्थानम्, 7/82-84)





चतुर्णामपि दुष्टानां देशकालानिलाम्भसां भेषजोपपादनं पूर्वमेव क्रियते चेत् जनाः आतुराः न भवन्ति। अधः उक्तः विधयः येषां मृत्युजनकदैवसामान्यं तथा च मारककर्मसामान्यं नास्ति, तेषु अवधारणीयाः इति कथयति -

येषां न मृत्युसामान्यं सामान्यं न च कर्मणाम्। कर्म पञ्चविधं तेषां भेषजं परमुच्यते॥
रसायनानां विधिवच्चोपयोगः प्रशस्यते। शस्यते देहवृत्तिश्च भेषजैः पूर्वमुद्धृतैः॥
सत्यं भूते दया दानं बलयो देवतार्चनम्। सद्वृत्तस्यानुवृत्तिश्च प्रशमो गुप्तिरात्मनः॥
हितं जनपदानां च शिवानामुपसेवनम्। सेवनं ब्रह्मचर्यस्य तथैव ब्रह्मचारिणाम्[5]॥

आचार्येण सुश्रुतेन उल्लिखितेषु संक्रमणनिवारकेषूपायेषु उचितदूरीस्वच्छतादीनां पूर्णध्यानं सम्पाद्य प्रदत्तनिर्देशानां पालनं करणीयम्। उष्णजलस्य प्रयोगः, गिलोयः, अश्वगन्धा, त्रिकटुः (सौंठ, कृष्णमरीचिका, पीपलः) हरिद्रा, आमलकं, दशमूलक्वाथं शिरषम्, अमृतादिक्वाथम् इत्यादयः औषधयः कोरोनाविषाणोः नाशनाय उपयोगिन्यः अभवन्। अनुभवाधारितैका योजना आयुर्वेदचिकित्सकानाम् उपयोगाय अत्र प्रस्तूयते, यस्यां समयपरिस्थित्यनुसारं योजनां कृत्वा सा प्रयोक्तुं शक्यते –

1. पुनर्नवादिक्वाथम् - 5-5-5 gm.।

   गोजिह्वादिक्वाथम् - 5-5-5 gm.

   दिवसे त्रिवारं क्वाथं कृत्वा प्रयोक्तव्यम्।

2. संशमनी वटी 2-2-2 गुलिकाः

   सुदर्शनघनवटी 2-2-2 गुलिकाः

दिवसे त्रिवारं उष्णजलेन प्रयोक्तव्यम्।

3. तालीसादिचूर्णम् 2-2-2 gm.।

गिलोयसत्त्वम् 500-500-500 mg.।

गोदन्तीभस्म 250-250-250 mg.।

लक्ष्मीविलासरसः 250-250-250 mg.।

शुभ्रभस्म 100-100-100 mg.।

एताः औषधीः दिवसे त्रिवारं मधुना अदरकरसेन उत उष्णजलेन औषधरूपेण प्रयोक्तव्यम् ।

4. हरिद्राखण्डः 1-1-1 चमसः

एकस्मिन् चषकपरिमाणके उष्णजले संमिश्र्य चायवत् पातव्यम्।

5. दिवसे त्रिवारं शुभ्रा अथवा सैन्धवलवणं मिश्रीकृत्वा कवलं (Gargle) कारयेत्। तदुक्तम् -

'अजीर्णश्च जरत्याशु पीतमुष्णोदकं निशि'[5]।

परिशेषे शक्यवक्तुं यत् व्याधयः केवलं संक्रमणेन न भवन्ति, अपि तु अस्याः वैश्विकमहामार्याः कृते 'कोविड- 19' इत्यनेन संक्रमणेन सह अनुचितः आहारः, अधारणीयानां वेगानां धारणं, धारणीयवेगानाम् अधारणं, दिनचर्यायाः ऋतुचर्यायाः च उपेक्षा, षड्रसयुक्तस्य आहारस्य असेवनं, समुचितमात्रायाः अधिकाहारस्य गरिष्ठाहारस्य वा सेवनं, पर्यावरणप्रदूषणम्, अनैतिकाचरणादीनि अस्वास्थ्यकराचरणानि

[5] *हारीतसंहिता* (प्रथमस्थानम्, 7/82-84)





चेत्यादीनि अपि प्रत्यक्षतया परोक्षतया वा कारणभूतानि सन्ति । व्याधयः निजैः (शारीरिकदोषवैषम्यादिभिः) आगन्तुजैः (संक्रमणेन अन्यबाह्यकारणैश्च) कारणैः उत्पद्यन्ते। निजकारणानि आगन्तुजकारणानां पोषणं कुर्वन्ति, आगन्तुजकारणानि च निजकारणानां पोषणं कुर्वन्ति। अतः उभयोरपि सन्तुलनम् आवश्यकम्। आयुर्वेदचिकित्सा पद्धतिमात्रं नास्ति, अपि तु सम्पूर्णजीवनविज्ञानं विद्यते। आयुर्वेदे केवलं वनस्पतिभिः कन्दमूलैश्च चिकित्सा क्रियते, वनस्पतयः तु प्राकृतिक्यो भवन्ति इत्यस्मात् आयुर्वेदचिकित्सापद्धतिः निरापदत्वं प्राप्नोति, एतावन्मात्रम् आयुर्वेदस्य महत्त्वं नास्ति, अपि तु आयुर्वेदपद्धतिः एका सम्पूर्णचिकित्सापद्धतिः वर्तते, या विज्ञानसम्पन्ना विद्यते। आयुर्वेदस्य वैज्ञानिकस्वरूपं जीवने अङ्गीकृत्य गम्भीरतया तत्प्रयोगः आवश्यकः वर्तते। आयुर्वेदस्य उपयोगः निखिलजगति कल्याणकारी विद्यते तथा च अस्य सामाजिकस्वीकार्यता अस्मिन् वैश्विकमहामारीकाले समुत्पन्नापि वर्तते । आयुर्वेदाय अयं कालः अवसररूपो विद्यते ।

## परिशीलिता ग्रन्थानुक्रमणी


चट्टोपाध्याय, प्रभाकर. *आयुर्वेदेर इतिहास*, तृतीय खण्ड, कलिकाता, १३७०।

भट्टाचार्य, विजयकाली. *आयुर्वेदेर इतिहास*, कलिकाता, १३६१ वङ्गाब्द।

विद्यालंकार, अत्रिदेव. *आयुर्वेद का इतिहास*. हिन्दी साहित्य सम्मेलन, प्रयाग, 1954।

सरस्वती, स्वामी प्रत्यगात्मानन्द. *वेद ओ विज्ञान*, कलिकाता संस्कृत महाविद्यालय गवेषणा ग्रन्थमाला, कलिकाता,

१९६७।

Bagchi, Ashoke kumar. *Medicine in Medieval India : 11th to 18th Centuries*. Delhi. 1991.

Krishnankutty Varier, N.V. *History of Ayurveda* . Arya Vaidya Sala, Kottakkal. 2009.

Kutumbia, P. *Ancient India Medicine*, Madras, 1964.

# How to Collect the Hard Copy of the Journal

The life member ,Prime member, Single member and Library holders may collect the journal by post. SUBSCRIPTION

1- Life member-10000/-(Ten Thousand0
2- Prime member- 6000/-(Six Thousand)
3- Single copy member -2200/- ( Two thousand Two hundred)
4- Library Copy for one year- 2200/-( Two thousand Two hundred)

## Facility

The **life members** will advise the board for qualitative publication. They may publish their paper in any issue . They will be invited for different research activities of MVNRI and seminars . They may collect every issue of the journal free of cost. Only postal charges may be collected. The Life member certificate will be issued to them.

The **prime members** are eligible for publish 3 research papers in coming issues and collect the concern copies free of cost. Invitation will be sent to them to participate in MVNRI academic works.

Single copy members will get their hard copy by post free of cost.

The journal copies of the concern year **will** be sent by post to the **library subscriber** only.

The Registration form with online payment procedure is given our

**web site,notice board**

**Let us serve our nation through this academic journey.s**





# Political system as reflected in Vedic Literature

**Sanchita Kundu**
Assistant Professor, Department of Sanskrit
Hooghly Mohsin College, Hooghly

Before going into the discussion of political system in Vedic period, it is imperative to understand the rise of the idea of the term king or *rājan* during the ancient time. It is supposed that the term came into existence out of fear of attack from the outside hostile force and from one's own community. Owing to that sense of fear the term came into effect, as a protector or as a ruler to rule over.

The man was personified as King of a group of individuals or of a territory over which one exercises his power and influence. The most vital reason of origin of such thinking was to get protection and hence sometimes the application was explicitly limited to kṣatriya, a member of the second class of the society.

The idea of protecting people was main and hence well known synonyms arising out of that were *nṛpa*—"protector of men", *bhūpa* and *bhūpāla* "protector or guardian of the earth"; The phrase "herdsman of the people" *(gopā-janasya)* was found even at the time of *Ṛgveda*—

*"kuvinmā gopaṃ karase janasya*
*kuvidrājānaṃ maghavannṛjīṣin/*
*kuvinma ṛṣiṃ papivāṃsaṃ sutasya*
*kuvinme vsvo amṛtasya śikṣāḥ//"* [1]

In *Manu's* law book the alternative name of *Kṣatriya* was qualified as protector. In the *Mahābhārata* member of military class was called *Kṣatriya*. The word was derived from two parts which in unison expressed the statement— he who saves from injury:

"*kṣatād yo vai trāyatīti sa tasmāt kṣatriyaḥ smṛtaḥ.*"

A resembling elucidation of the word *Kṣatriya* already existed in the *Bṛhadāraṇyaka-Upaniṣad* where it is expressed that nobility *(kṣatram)* was "life-breath" *(prāṇaḥ)*; the breath of life protected *(trāyate)* one from hurt *(kṣaṇitoḥ)*—

"*kṣatraṃ prāṇo vai kṣatraṃ prāṇo hi vai trāyate hainaṃ prāṇah kṣaṇitoḥ /*
*prakṣtramāpnoti kṣatrasya sāyugjaṃ salokatāṃ jayati ja evaṃ veda//*" [2]

"All creatures live happily in the world if they are protected by kings like children protected by their father."

Kings were indeed regarded as the protector of the earth owing to their possessing a strong armed force—

*"nāvāgerambarīṣasya bhujābhyāṃ paripālitā/*
*vabhūva vasudhātyathyaṃ tāpatrayavivarjjitā//"* [3]

There were so many descriptions of king in Hindu ancient scriptures such as : *dīrghabāhu* (of long arms), *mahābāhu* (of mighty arms), *vipulam, mahābāhuḥ, mahoraskaḥ* (broad-shouldered, long armed, broad-chested) —

*"buddhimān nītimān vāgmī śrīmān śatrūnirvahaṇaḥ/*
*vipulāṃso mahāvāhuḥ kamvugrīvo mahāhanuḥ//"* [4]

King's character had been compared with a poisonous snake. As snake is deadly even when young, in the same way a king can protect the earth even in boyhood.

*"tatpālanādastu sukhopabhogo/*
*dharmmāt phalaṃ prāpsyasi cāmaratvaṃ//"* [5]

The very happiness and richness of a king arises mainly from his ability to give protection to his subjects against external threat and aggression. So it





has been said that when the gods marched for war against *asuras* then they wanted *Indra* to be their chief in the war campaign, because otherwise it would be like people to wage war without a king—

"*nārājakasya yuṇvamasti. Indramanvicchāmeti.*" [6]

It had been described in *Vāyu Purāṇa* that King *Yayāti* had served and rendered services to different classes of personalities and persons according to their status in the then society such as : to please *(atarpayat)* the gods with sacrifices , the ancestors with *sràddhas*, the poor with favour *(anugraha)* the *Brahmanas* according to their desires, the guest with drinks, food etc., the *vaisyas* with protection, the *śūdras* with equity *(ānṛśaṃsa)* and lastly the *dasyus* with due control (saṃnigraha) they deserved.

Thus, the king, by pleasing and entertaining his people according to dharma was a second *Indra* himself. There was also explication of the term *rājarṣi* — 'a kingly *ṛṣi*' - i.e. "an inspired sage of kingly decent, a king who at the same time is a *ṛṣi*" : he moves his subjects through their welfare. It is a fact that the administration of a country would be the best if it is run by a management headed by an active magnanimous and iron willed benevolent king as when *Rāma* was king, in the epic *Rāmāyaṇa* it is said —

*"na paryadevan vidhavā na ca vyālakṛtaṃ bhayaṃ/*
*na vyādhijaṃ bhayancāñsīd rāme rājyaṃ praśāsati//"* [7]

During Rāma's tenure there was no widow, no beasts of prey, no diseases were there to suffer, and no enemy to fight. The younger generations were enjoying longevity of old age life, each and every persons were the ardent follower of Dharma; the trees were always flowering and bore fruits without any interruption, desired rain fall was there, the wind was agreeable. It means there was no natural calamity or disaster; lastly everybody in the kingdom was content and happy—

*"āsan prajā dharmaparā rāme śāsati nānṛtāḥ/*
*sarve lakṣaṇasampannāḥ sarve dharmaparāyaṇāḥ."* [8]

The *Ṛgveda*, had thrown a considerable light on political and legal institution of the Vedic age. Based on the same foundation of Vedic code of conduct and Dharma *Yājñavalkya, Manu, Kauṭilya* and others with their enriched high value of ethics developed a healthy political tradition and welfare system of coming generation of people.

Thus the basic thinking of Vedic philosophy of life has contributed a lot to the theory of conception of state and its organisation which has become the most striking and important feature of Indian political thought. Vedic thinking has also deeply influenced the Indian society irrespective of its caste system.

The society in the Vedic period was patriarchal. The family or *Kula* was the basic unit of political organisation headed by *Kulapa* or *Gṛhapati*.

The next stage of change was established in the objective formation of *Grāma* or Village headed by *Grāmaṇī*. It was a most logical change through evolutionary force and as a result, group of villages was called Viś. Those among the *kulapati*, who were noted for their strength and leadership, used to become *Viśpati*. *Viśpati* was the tribal chief. From the position of *Viśapati* one would rise to the position of the *janapati* for similar qualities.

According to the *Ṛgveda* when the land was occupied by the Aryan people the administrative machinery of the Aryan people worked with the tribes by keeping the tribal chief at the centre of administration because of the Chief's remarkable valour in the battle field and his efficient alacrity in the administration of their own tribal affairs.

The above fact indicated clearly that the ancient Indians believed that the kingship arose out of military necessity, and the king must be powerful, efficient and must have valour and capability to be a successful general whose leadership would be accepted by all without any challenge from his clan or people.

It was also noted that in the situation where standing army was absent then the kings depended on the Viś who would make and organise groups of





militia personnel for the *rājās* or kings. In the *Ṛgveda* there were mention of assemblies such as *Sabhā*, *Samiti, Vidatha, Gaṇa*. These organised military personnel and religious functions.

A study of Vedic literature would make it more evident that there were many controlling kings reigning over numerous states with which Afganistan and Punjab were then included and thus made a prominent part of the Vedic civilization. *Ṛgvedic* city were as small as city state of ancient Greece spreading over an area of few squire miles. It had a capital as large as sum total of a few dozen of villages.

Villages had their own assemblies called *sabhās* and the capital had central assemblies called *samiti*. *Sabhā* and *samiti* at the time of the *Vedas* were used to be regarded as a place of high esteem and in one place—

*"sabhā ca mā samitiścāvatāṃ*
*prajāpaterduhitarau saṃvidāne /*
*jenā saṃgacchā upa mā sa*
*śikṣāścāru vadāni pitaraḥ saṃgateṣu//"* [9]

They were regarded as a twin daughters of *Prajāpati*, the Creator. The place of assembly was holding such an high esteem in the mind of the then people that men and their new wed used to foster a well cherished ambition that one day they would be able to sit at that high place of political institution and be able to draw the attention and command of the proceeding of the assembly by the prowess of their power of persuasion and through the their oratory alacrity—

*"je grāmā yadaraṇyaṃ jāḥ sabhā adhi bhūmyāṃ/*
*je saṃgrāmāḥ samitayasteṣu cāru vadema te//"* [10]

The *Vidatha* seems to be more popular assembly rather than either *Sabhā* or *Samiti* in the *Ṛgvedic* period. *Vidatha* was a congregation or assembly where men and women participated and were equated. *Vidatha* the word seemed to be derived from the root *Vid* to know and perhaps professed

religious or sacrificial gathering, rituals where highest knowledge was required for representation. It was a large gathering and arrangement were made for singing and dancing.

Women were in habit to take active part in the *Vedic* sacrifices and were very prominent in the assembly of *Vidatha.* One passage of *Athervaveda* said that *vrātya* was followed by the members of the sabhā, samitī and the army—

*"taṃ sabhā ca samitiśca senā ca surā cānuvyalan."* [11]

With the evolution of time the idea of King or Monarch took shape in the mind of the then society and people. The authority of executing power over the clan and society was bestowed on the best and fittest among the persons of that period of time and society having superior intelligence, valour and outstanding leadership.

In Indian political thoughts Kings were entrusted with the most important and fundamental duties based on Vedic dictum and rules of law written in the passages of *Saṃhitās, Śruti* and *Brāhmaṇas.*

During the earlier part of monarchism duties of monarchs and kings came down as power of authority. During the Vedic period some functions of king were expressed in *Śatapatha Brāhmaṇa*—

"*niṣasāda dhṛtabrata iti dhṛtabrato vai rājā...sukraturiti rājyājetyevaitadāha jadāha sāmrājyāya sukraturiti.*" [12]

This means the king, like the learned Brāhmaṇa, is the upholder of the sacred ordinances (*dhṛtavrata*); he should speak and do only what is right. The king was the sole maintainer of the order of life. He had to maintain the established rule and order. The king should compel his subjects to follow the respective *Dharma* and commit only in accordance with the righteousness. The king and the priest jointly upheld the moral and ethical part of the world.





Politically *Upaniṣads* reveal well organized pattern of Government. We may refer to *Aśvapati* mentioned in *Chāndogyopaniṣad* whose kingdom is well ordered.

"*na me steno janapade na kadaryo na madyapo*
*nānāhitāgnirnāvidvān na svairī svairiṇī kutaḥ*". [13]

A king was kept above the periphery of punishment—

"*tasmād rājādaṇḍyo jadenaṃ daṇḍavadhamatinayanti*" [14]

It seemed as Western proverb 'that King cannot do any wrong'. But under the ancient Indian political concept king too had to undergo punishment but of course in different manner. Sacrificing some amount of money he would throw into water as fine as it was taught —

*"īśo daṇḍasya varuṇo rājñāṃ daṇḍadharo hi saḥ/*
*īśaḥ sarvasya jagato brāhmaṇo vedapāragaḥ//"* [15]

*Varuṇa* was the lord of punishment because he held the sceptre even over kings and *Varuṇa* maintained closed relation with the water and so atonement was to be in that way. But there was also an alternative by which punishable act would be annulled by giving '*dakṣinās*' (donation) to Brāhmins.

If a king kills a Brāhman he can be released from his heinous crime, according to some later authorities, by conducting an *aśvamedha* (horse sacrifice) *yajña*, as it would be regarded as his utmost atonement for the crime he committed knowingly.

Moreover, it was mentioned in one of the ancient *Upaniṣads* that in the beginning this world was in the guise of Brahmā—

*"brahma vā idamagra āsīdekameva tadekam sanna vyabhavat tacchreyo rūpamatyasṛjata kṣatraṃ yānyetāni devatrā kṣatrāṇīndro varuṇaḥ somo rudraḥ parjanyo yamo mṛtyurīśāna iti / tasmāt kṣatrāt paraṃ nāsti tasmād brāhmaṇaḥ kṣatriyamadhastādupāste rājasūye kṣatra eva tadyaśo dadhāti saiṣā...hinsitvā."* [16]

As he was alone so he could not bloom, it created *kṣātra* power, or rather emerge from it, and afterwards the third and fourth classes. Yet 'He' did not bloom. He then created *Dharma*, and this too emerged from *Brahmā* and that Dharma was the ruling power of *Kṣatriya* class *(kṣatrasya kṣatram)*. Therefore, the text bluntly said, "there is nothing higher than *Dharma*," so a weak man could defeat a strong man by means of justice as one could do through a king.

Later on in comparatively more advanced society kings and monarchs exercised the authority to tax people in exchange of giving them protection.

"yathā gauḥ pālyate kāle duhyate caththa prajāḥ/
sicyate ciyate caiva latā puṣpafalārthina//"[17]

Not only this the ruler was to help men of all classes in realising their earthly and spiritual aims. The great poet *Kālidasa* also described the king as an extraordinary person and distinct from other people—

*"śamayati gajānanyāngandhadvipaḥ kalabho'pi san*
*prabhavatitarāṃ vedodgraṃ bhujangaśiśorviṣaṃ/*
*bhuvamadhipatirvālāvastho'pyalaṃ parirakṣituṃ*
*na khalu vayasā jātyaivāyaṃ svakāryasaho ganaḥ//"* [18]

The ruler must always look after his won security—

*"ātmānaṃ satataṃ rakṣed dārairapi dhanairapi."* [19]

The foremost duty of a ruler was to look after the well being of his subjects. His first and foremost aim should be to seek his realm's happiness and affluence—

*"adhikaṃ śuśubhe śubhaṃ yūnā*
*dvitayena dvayameva saṃgataṃ/*
*padamṛddhamajena paitṛkaṃ*
*vinayenāsya navañca yauvanaṃ//"* [20]





On the other hand, living under the realm of a bad kings would lead to destruction. In this light from mantras of Atharvaveda could be cited : "be this king dear to kine herbs, cattle"—

"*ayaṃ rājā priya indrasya bhūyāt priyo gavāmoṣodhīnāṃ paśūnām*". [21]

As *Nārada* said—

"na lipyate yathā vahnirdahan śasvadapi prajāḥ/
na lipyate tathā rājā daṇḍaṃ daṇḍeṣu patayan//"[22]

"...fire is not polluted even though it always burns the creatures of the world, similarly a king is not polluted by inflicting punishment on those who deserves it", and also he mentioned that as the golds become pure in fire, all gains are stated to become pure in the hands of kings. Under such *Vedic* dictum and philosophic thoughts of ancient *Vedic Ṛṣis* Indian kings had reigned people.

During the pre-Vedic and early part of Vedic period small tribal units used to function as a popular assembly and since then king's power and his function was not extensive, his judicial power was confined within a limited small area. In course of time as an effect of evolution, when the state became territorial in character and very large in size then on the reasonable ground the power of patriarchal chiefs like *the kulapatis viśpatis* declined. Simultaneously the popular *Samiti* too faded away from the field of administration owing to its inability to function properly on the large perspective of social and political structure. But in due course as the society and community became large and complicated to administer so under such circumstance powers and privileges of kings increased in proportion. Even in the Ṛgveda we find the references of *ekarāts* (sole ruler), *adhirāts* (great rulers) and *samrāts* (emperors).

At this time Indian political system came in contact with term like *Rājadharma. Rājyaśāstra, Daṇḍanitī, Nītiśāstra, Arthaśāstra.* Some of these terms like *Rājadharma*— "duties of the king" was used by *Manu* and other

*Smṛti* writers. As Monarchy became a natural reality, so the system of the government and the science of politics were called *Rājdharma* or *Rājyaśāstra*. In these systems *Daṇḍanitī* became self-explanatory in its application by the supreme authority because like modern thinkers *Manu* was also of the opinion that the ultimate sanction behind the state was force and if it was not used then its only alternative i.e. law of jungle would prevail upon the society and the country. It was the *Daṇḍa* or punishment which ruled over all subjects, it was the *Daṇḍa* which protected them; when all were sleeping, *Daṇḍa* only kept itself awaken; law was nothing but *Daṇḍa* itself—

*"daṇḍaḥ śāsti prajāḥ sarvā*
*daṇḍa evābhirakṣati/*
*daṇḍaḥ supteṣu jāgarti daṇḍaṃ*
*dharmaṃ vidhurvudhāḥ//"*[23]

*Daṇḍa*, however, must be applied under strict discretion otherwise it would produce adverse effect on the subjects, society, and country as a whole. But if it was applied in proper manner under strict jurisprudence then the subjects would be happy and country would accelerate towards the realm of prosperity—

*"tīkhṇa daṇdo hi bhūtānāmudvejanīyaḥ/*
*mṛdudaṇḍaḥ paribhūyate/*
*jathārthadaṇḍaḥ pūjyaḥ."* [24]

**End Notes:**

1. Ṛg.V. 3.43.5
2. Bṛ.U. 5.13.4
3. Vā. Pu. 88.172
4. Rā. 1.1.9
5. Mārk.Pu. 26.35





6. Tai.Br. 1.5.9.1
7. Rā. 6.128.98
8. Rā. 6.128.105
9. A.V. 7.12.1
10. A.V. 12.1.56
11. A.V. 15.10.1.2
12. Śa. Br. 5.4.4.5
13. Ch.U. 5.11.5
14. Śa.Br. 5.4.4.7
15. M.S. 9.245
16. Bṛ. U. 1.4.11
17. Kā. Nī. 5.84
18. Vikra. 5.18
19. M.S. 7.213
20. Raghu. 8.6
21. A.V. 4.22.4
22. Nā. Sm. 17.18
23. M.S. 7.18
24. Kau. Ar. Śā 1.4

# BIBLIOGRAPHY


1. Aiyar, Dr. C. P. Ramaswami: *The Cultural Heritage of India*, Vol. -II. The Ramakrishna Mission Institute of Culture, Calcutta, 1969 (Rept).
2. Albre, Cht Weber: *The History of Indian Literature*, London, Trubner and Co. Ltd, 1875.
3. Aurobindo, Sri: *The Secret of the Veda*, Pandicherry, Sri Aurobindo Ashram, 1971.
4. .Basu, Yogīrāj: *Veder Paricaya*, Kolkata, Sanskrit Pustaka Bhandara, 1377 (Bangabda).
5. Bergaigne. Abel: *Vedic Religion*, Poona, Aryasamskrti Prakasana, 1973.
6. Bose, A. C: *The call of the Vedas*, Bombay, Bharatiya Vidya Bhavan, 1960.
7. C, Ramaswami (Ed): *The Cultural Heritage of India*. Vol. - II. Calcutta, The Ramakrishna Mission Institute of Culture, 1969 (Rept).
8. Dāsaḥ Amar: *Ekādaśopaniṣadḥ*, Delhi, Motilal Banarasidass, 1966.
9. Dasgupta, Surendranath: *A History of Indian Philosophy*, Vol-I & II. Delhi, Motilal Banarsidass, 1975.
10. Deussen, Paul: *The Philosophy of the Upanishads*, Delhi, Oriental Piblishers.,1972.
11. Dey Nundalal: *Civilization in Ancient India*, Varanasi, Indological Book House, 1972.






# LIST OF ABBREVIATIONS

| | | |
|---|---|---|
| A. V. | : | Arthavaveda |
| Bṛ. U. | : | Bṛhadāraṇyakaopaniṣad |
| Ch. U. | : | Chāndogyopaniṣad |
| Kau. Ar. Śā. | : | Kautilīyārthaśāstra |
| M. S. | : | Manusaṃhitā |
| Nā. Sm. | : | Nārada. Smṛti |
| Raghu | : | Raghuvaṃśa |
| Rā. | : | Rāmāyaṇa |
| Śa. Br. | : | Śatapatha Brāhmaṇa |
| T. Br. | : | Taittirīya Brāhmaṇa |

# पिङ्गलच्छन्दःशास्त्रे पाणिनीयाष्टाध्याय्याः प्रभावः

- ड. अमृतासिंहिः[1]

**शोधसारः**- अष्टाध्यायी इत्यनेन यद्यपि पाणिनिकृतिरेव प्रथमतया स्मृतौ आयाति तथापि अन्यापि अष्टाध्यायी विराजते पिङ्गलमुनिविरचिता छन्दःसूत्राख्या यत्र विषयप्रकाशने पाणिनीयाष्टाध्याय्याः शैली एवानुसृता वर्तते । यद्यपि पाणिनीयशब्दानुशासनस्य सर्वशास्त्रोपकारकत्वं प्रसिद्धमेव शास्त्राणां वाक्यात्मकशब्दत्वात्, तथापि इतराणि कानिचन वैशिष्ट्यानि वर्तन्ते अष्टाध्याय्यां यानि पिङ्गलाचार्येण स्वकीयग्रन्थविरचने प्रायशः अनुसृतानि। तानि सूत्रत्वानुवृत्त्युत्सर्गापवादादीनि वैशिष्ट्यानि कथं छन्दःसूत्रे अनुप्रविष्टानि तदेवात्र शोधे मुख्यतः प्रतिपाद्यते।

**शब्दाङ्कुटाः**- अष्टाध्यायी, छन्दःसूत्रम्, पाणिनिः, पिङ्गलाचार्यः, सूत्रम्, अनुवृत्तिः, उत्सर्गः, अपवादः, लघु, गुरु, संज्ञा, अधिकारः, संक्षेपः।

"पाणिनीयं महाशास्त्रं सर्वशास्त्रोपकारकमि"त्यस्ति प्रसिद्धिरष्टाध्यायीविषये पदपदार्थविज्ञानपूर्वकत्वात् वाक्यवाक्यार्थज्ञानस्य समेषां शास्त्राणां च वाक्यात्मकत्वात्। अतः पदपदार्थविज्ञापनपुरःसरं पिङ्गलाचार्यविरचितशास्त्रार्थपरिज्ञापने अष्टाध्याय्या उपयोगः स्यादेवेति कैमुतीयन्यायसिद्धमेतत् पाणिनीयानुशासनस्य लौकिकवैदिकोभयसाधारणत्वात्। परन्तु एतद्वैशिष्ट्यं विहायापि सन्ति केचन विशेषा येषां प्रभावः छन्दःसूत्रे दरीदृश्यते। ते चात्र मुख्यत आलोच्याः।

ननु कोऽयं पिङ्गलः नाम? किंशताब्दीयो वा सः? स पाणिनेः पूर्वो वा परो वेति प्रश्नाः सुतरां समुद्यन्ति येषां च निर्णयं विना नैव विषयः अयमालोच्यः स्यात्। तथाहि उच्यते यत् यद्यपि पिङ्गलाचार्यैः स्वयं कुत्रापि स्ववंशादिकं नोल्लेखि तथापि छन्दःसूत्रकाररूपेणैव पिङ्गलः अधिकः प्रसिद्धः। इदं च छन्दःशास्त्रं वेदाङ्गमित्यतः वेदार्थविद्यमिति निश्चयः। अपि चायं पिङ्गलः आचार्य- नागेत्यादिविशेषणैः विभूषितः आसीत्। तेन च अस्य शिष्यप्रशिष्या आसन् इत्यपि सिध्यति। तदुच्यते आचार्यस्वरूपविषये-

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।(मनुः, 2.140) इति।

छन्दःसूत्रवृत्तिकारः हलायुधः एनं महोदयमाचार्यरूपेणैव उल्लिखितवान्। तदुच्यते तेन मृतसञ्जीवन्याः प्रारम्भे एव "पिङ्गलाचार्यसूत्रस्य मया वृत्तिर्विधास्यते।" इति (छन्दःसूत्रे 1.1)। किञ्चायं जनः नागवंशीयः

[1] [illegible]





इत्यतः नाग इत्यन्योपाधिरिति केचन। पाणिनीयशिक्षाग्रन्थस्य रचयितृरूपेणापि अस्य उल्लेखः प्राप्यते। तथाहि टीकाकारः गोविन्दमहोदयः पाणिनीयशिक्षाग्रन्थस्य शिक्षाप्रकाशाख्यायां टीकायां लिखति आदिमश्लोकव्याख्याकाले

"व्याख्याय पिङ्गलाचार्यसूत्राण्यादौ यथायथम्।

शिक्षां तदीयां व्याख्यास्ये पाणिनीयानुसारिणीम्।।

ज्येष्ठभ्रातृभिर्विहिते व्याकरणे अनुजस्तत्र भगवान् पिङ्गलाचार्यस्तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते।" इति(पा.शिक्षा- 1)। एवमेतेन एतत् स्पष्टं प्रतिभाति यदयमस्ति शिक्षाकारः अपि अपि च अयमाचार्यः पाणिनेरुत्तरकालीन इत्यपि साक्षात् टीकाकर्त्रैव उच्यते। अपि च, छन्दःसूत्रे कात्यायनस्यापि नाम प्राप्यते । अयं च कात्यायनः पाणिनेरुत्तरभावी वार्त्तिककार इति तन्नामोल्लेखात् नूनमयं पाणिनेरुत्तरकालीन इति सिध्यति। अयं च ख्रीष्टपूर्वतृतीयशताब्दीयः इति इतिहासविदः। अतः पाणिनिविरचिताया अष्टाध्याय्याः प्रभावः तदीये छन्दःसूत्रे स्यादिति तर्क्यते।

ननु किमिदं छन्दःसूत्रं नाम? तत्राहुच्यते यत् पिङ्गलाचार्यविरचितं छन्दःसूत्रमिदं छन्दःप्रतिपादकं शास्त्रम्। अत्र च छन्दसाञ्चास्य सूत्राकारेण रचितत्वात् शास्त्रमिदं छन्दःसूत्रमित्युच्यते। तथा हि छन्दो नाम प्रायस्पदावच्छेद एव। उच्यते च सर्वानुक्रमण्याम्- यदक्षरपरिमाणं तच्छन्द इति। स चावच्छेदः कालेन संख्यया च भवति। तथाहि उच्यते हलायुधेन मृतसञ्जीवन्याम्- 'छन्दःशब्देनाक्षरसंख्यावच्छेदोऽत्राभिधीयते।' इति (छन्दःसूत्रम्-2.1)। उच्यते च निरुक्ते 'छन्दांसि छादनात्' इति (निरुक्तम्- 7.12.2)। तथाहि चुरादिगणोक्तात् छदिधातोः असुन्प्रत्ययेन छन्दःशब्दो निष्पद्यते। भक्त्या तु कालेन संख्यया वा नियताक्षरपरिच्छिन्ना वागेव छन्द इत्युच्यते। तथाहि वेदे मन्त्रा द्विविधा उपलभ्यन्ते। केचन नियताक्षराः, केचन चानियताक्षराः नियताक्षरमन्त्राणां परिमाणविज्ञानाय स्वरूपविज्ञानाय चास्ति छन्दोविज्ञानावश्यकता। यथा एकेनावच्छेदेनावच्छिन्नाः मन्त्राः अन्यावच्छेदेनावच्छिन्नाःश्चैत् भिन्नार्थं मन्त्रं प्रतिपादयति। किञ्च, वैदिककर्मणि छन्दसामपि विनियोगः परिलक्ष्यते। तथाच विधयः – अनुष्टुभा गायति, बृहत्या गायति, गायत्र्या स्तौतीत्यादयः। तत्र गायत्र्यादिच्छन्दोविज्ञानं विना नैव सम्भवेत् तानि कर्माणि। तथाहि उच्यते बृहत्संहितायाम्

ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि ।

अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते। इति।

तच्च छन्दः वेदमात्रविषयोऽपि परवर्तिनि काले वैदिकमन्त्राणां केषांचित् चित्ताह्लादजनकत्वमनुभूय , तेषामाह्लादजनकतायां तादृशाक्षरपरिमाणस्यैव कारणतां विज्ञाय लौकिककवयोऽपि तादृशपरिच्छेदमास्थाय छन्दोबद्धां वाचमुचुस्ते कवयः। ततश्च लौकिककाव्यानामुद्भवः अभूत्। ते च कवयः क्रमशः अक्षरावच्छेदवैविध्येन विविधानि छन्दांसि रचयामासुः। तथाच, वैदिकच्छन्दस एव लौकिकच्छन्दसामाविर्भावो जातः। प्राप्यते च वैदिकवाचि लौकिकानामिन्द्रवज्रादीनां पादानामुपस्थितिः। तथा च- 'पृषन्वते ते चकृमा करम्भम्' (ऋ.सं- 3.3.18)।

इत्यत्र इन्द्रवज्रायाः, "रथं न दुर्गाद्वसवः सुदानवः" (ऋ.सं- 1.7.24) इत्यत्र मन्त्रे वंशस्थस्य लक्षणं संलक्ष्यते। एवं बहुत्रान्यत्रेन्द्रसूक्तादौ उपेन्द्रवज्रादीनां सद्भावो लक्षणीयः। एवं छन्दोबद्धवाचां कण्ठस्थीकरणमपि सुकरमिति विज्ञाय ते छन्दोबद्धवाग्भिरेव तेषां शास्त्राणि रचयामासुरिति तत्तच्छन्दोज्ञानमपेक्षितं तेषां शास्त्रपरिज्ञानायेति विचिन्त्य पिङ्गलाचार्यैः छन्दःस्वरूपप्रख्यापकं शास्त्रमिदं विरचितवान्। किञ्च, वाचः चित्तानन्दजनकं तत्त्वमिदं छन्दः लोकेषु विलसतु इत्यपि आसीत्तेषां हृदयम्। छन्दसः आह्लादजनकतामनुभूय एव केचन छन्दःशब्दः आह्लादकार्थकात् चदिधातोः निष्पन्न इति मन्यते। पिङ्गलाचार्यात् पूर्वमपि छन्दःशास्त्रमासीदिति छन्दःसूत्रे ताण्डिसैतवादीनामाचार्याणामुल्लेखात् ज्ञायते। परन्तु तानि नैव उपलभ्यन्ते अधुना।

एवं शास्त्रमिदं वैदिकलौकिकोभयछन्दोविषयकं शास्त्रम्। वेदोपकारकत्वाच्च वेदाङ्गम्। अत्रैवास्ति पाणिनेः प्रभावः।

**प्रथमतः** पाणिनिः यथा वैदिकलौकिकोभयशब्दसंस्काराय वैदिकलौकिकसाधारणं व्याकरणं अष्टाध्यायीं रचितवान् तथैव तदनुकृत्य पिङ्गलाचार्यः अपि वैदिकलौकिकोभयसाधारणानि छन्दांसि स्वकीये ग्रन्थे निरूपयितुं छन्दःसूत्रं रचितवान्। अत्रेदमवधेयं यत् मात्राछन्दांसि लौकिकान्येव। इन्द्रवज्रादीनि गणच्छन्दांसि तु लोके बहुलतया प्रयोगात् वेदे चाल्पशः प्रयोगात् लौकिकवैदिकानि। वेदे अक्षरच्छन्दांसि अवलोक्यन्ते। लोके तु अक्षरच्छन्दांसि नैवोपयुज्यन्ते इति अक्षरच्छन्दांसि वैदिकान्येव।

**द्वितीयतः** पाणिनीयाष्टाध्याय्यां यथा अष्टौ अध्यायाः विद्यन्ते तथैव अत्रापि छन्दःसूत्रे अष्टौ अध्यायाः वर्तन्ते। अतः इदमपि शास्त्रमष्टाध्यायी इत्यपि वक्तुं शक्यते।

**तृतीयतः**- अष्टाध्यायी यथा सूत्रात्मिका तथैव पिङ्गलच्छन्दःशास्त्रमपि सूत्रात्मकमेव। सूत्रलक्षणमप्युक्तं पराशरोपपुराणे-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।

अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥ इति।

अल्पाक्षरत्वञ्च छन्दःसूत्रे "ग्लौ" (1.14) "हे" (1.12) इत्यादौ स्पष्टम्।

**चतुर्थतः**- अष्टाध्यायीवत् स्वल्पाक्षरत्वसिद्ध्यर्थं यथा प्रत्याहारार्थानां माहेश्वरसूत्राणां विन्यासः अष्टाध्याय्यामादिमे एवाध्याये उत्तरत्र सूत्रोपयोगिवृद्ध्यादिसंज्ञानां विन्यासश्च दृश्यते तथैव पिङ्गलछन्दःसूत्रे आदिमे एवाध्याये संक्षेपेण स्वकीयं शास्त्रं रचयितुं मकारादिसंज्ञानां निर्देशः प्राप्यते। तथाहि सूत्रितम् - "धीश्रीस्त्री म्" (1.1), "गृ ल्" (1.9)इत्यादीनि सूत्राणि गणादिस्वरूपप्रकाशकानि।

**पञ्चमतः**- अष्टाध्याय्यां प्रत्याहारप्रयोजनानि अइउण् इत्यादीनि सूत्राणि यथा मुख्यानि तथैव "धीश्रीस्त्री म्" (1.1), "वरा सा" (1.2) इत्यादीनि गणस्वरूपप्रख्यापकानि प्रारम्भिकानि सूत्राणि अपि तथाहि "अइउण्"





इत्यादीनि सूत्राणि यथा शब्दानुशासनेन सह मोक्षप्रकाशकान्यपि तथैव "धीश्रीस्त्री म्" (1.1) इत्यादीनि सूत्राणि छन्दसामनुशासनेन सह मोक्षोपयोगीनि। एतच्च नन्दिकेश्वरकृतायां काशिकायां हलायुधवृत्तौ च स्पष्टम्।

**षष्ठतः** - अष्टाध्याय्यां यथा लाघवेन शब्दानुपदेष्टुं षड्विधानि सूत्राणि रचितानि तथैव छन्दःसूत्रे अपि तादृशानि सूत्राणि प्राप्यन्ते। तदुच्यते सूत्रभेदविषये-

संज्ञा च परिभाषा च विधिर्नियम एव च।

अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥ इति।

एतादृशानि सूत्राणि छन्दःसूत्रे प्राप्यन्ते। तत्र कानिचन उदाह्रियन्ते। तथाहि "धीश्रीस्त्री म्" (1.1), "वरा सा य्" (1.2) इत्यादीनि संज्ञासूत्राणि। "गायत्र्या वसवः" (3.3) इति परिभाषासूत्रम्। तदुच्यते अस्य सूत्रस्य वृत्तौ हलायुधेन- "परिभाषेयम्। गायत्र्याः पादे वस्वोऽष्टाक्षराणि भवन्ति। यत्र गायत्र्याः पादोऽभिधास्यते तत्राष्टाक्षरो ग्राह्यः।" (छन्दःसूत्रे 3.3)इति। एवं "जगत्या आदित्याः" (3.4) इत्यादीनि सूत्राणि द्रष्टव्यानि। "इयादिपूरणः" (3.2) इत्यादीनि विधिसूत्राणि तदुच्यते हलायुधवृत्तौ- "यत्र गायत्र्यादिच्छन्दसि पादस्याक्षरसंख्या न पूर्यते, तत्रेयादिभिः पूरयितव्याः" इति। एवं "गन्ते" (1.10) इत्यस्ति अतिदेशसूत्रम्। "छन्दः" (2.1), "गायत्री" (2.2), "पादः" (3.1) इत्यादीनि सूत्राणि अधिकारसूत्राणि। एवं सर्वत्र सूत्रभेदविषये अपि वर्तते पाणिनेरनुकरणम्।

**सप्तमतः**- सूत्रशरीरपूरणे पाणिनीयतन्त्रे निर्देशो वर्तते यत् "सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र" इति। अयमपि नियमः पूर्णतया आश्रीयते पिङ्गलछन्दःसूत्रे। तथाहि अनुवृत्तिस्तु यत् चिविधा प्रसिद्धा। तदुच्यते-

सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च।

गङ्गास्रोत इति ख्यातास्त्वधिकारास्त्रयो मताः॥ इति।

तथाहि सिंहावलोकितन्यायेन पूर्वत्र सूत्रे परस्मात् सूत्रादनुवृत्तिर्दृश्यते "ग्लिति समानी" (5.7) इति सूत्रे। तथाहि अत्र परस्मात् "पादस्यानुष्टुब्वक्त्रम्" (5.10) इति सूत्रात् अनुष्टुप् इति पदमत्र सूत्रे अनुवर्तते। एवं मण्डूकप्लुतिन्यायेन नाम पूर्वस्मात् सूत्रात् सव्यवधाने परत्र सूत्रे अनुवृत्तिः दिङ्मात्रमुदाहरणं तावत् "शालिनी म्तौ तौ ग् समुद्रऋषयः" (6.25) इति सूत्रात् परत्र "वृन्ता नो म्गौ ग्" (6.30) इति सूत्रे समुद्रऋषयः इति पदस्य कानिचित् सूत्राणि परित्यज्यानुवृत्तिः। एवं गङ्गास्रोतवत् निरवच्छिन्नतयानुवृत्तिरपि छन्दःसूत्रे अवलोक्यते बहुत्र। अत्र दिङ्मात्रमुदाहरणं तावत् "गन्ते" (1.10) इति सूत्रात् ग् इत्यस्य "ध्रादिपरः" (1.11), "हे" (1.12) इत्यादौ अनुवृत्तिः। एवं पाणिनितन्त्रे यथानुवृत्तिरुपलभ्यते तथैवात्र।

**अष्टमतः**- पाणिनिमुनिः शब्दानुशासने यथा उत्सर्गापवादन्यायमाश्रितवान् तथैव पिङ्गलः अपि। तथाहि "गन्ते" (1.10) इति सूत्रस्य वृत्तौ हलायुधेन लिख्यते "ननु ग्लिति समानी" (5.7) इत्यादीनां पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वं न दृश्यते। नैष दोषः। सर्वत्र पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वमुत्सर्गसिद्धम्। तच्च

लकारश्रुत्यापवादेन बाध्यते। यथा – ग्लिति समानी (5.7), गीत्यार्या लः (4.47) इत्यादी। सामान्येन विशेषस्य बाधः कस्य न संमतः।" इति(1.10)।

**नवमतः**- पाणिनीयलघुगुरुसंज्ञापि अत्र प्रायेणाश्रीयते। अपि चात्र किञ्चित् अधिकमुच्यते। तथाहि पाणिनिना स्वरवर्णानां कृते यथा "ह्रस्वं लघु" (1.4.10), "संयोगे गुरु" (1.4.11), "दीर्घञ्च" (1.4.12) इति सूत्राणि विरच्य लघुगुरुसंज्ञे निर्दिष्टे तथैव पिङ्गलेनापि "गृ लृ" (1.9), "ध्रादिपरः" (1.11), "हे" (1.12) इत्यादीनि सूत्राणि विरच्य ग्लसंज्ञे विहिते। अत्रेदमवधेयं यत् पिङ्गलेन पादान्ते अपि लघुवर्णस्य गुरुसंज्ञा कृता "गन्ते" (1.10) इति सूत्रेणेति विशेषः। किञ्च, यतिविन्यासे अपि सन्धियणादिज्ञानमपेक्षितमिति तच्च पाणिनीयतन्त्रसापेक्षमित्यपि विज्ञेयम्।

**दशमतः**- पाणिनिना यथा ग्रन्थान्ते अकारं द्विरुच्चार्य ग्रन्थसमाप्तिमाह "अ अ" (8.4.68) इति सूत्रेण तथैव पिङ्गलेनापि ग्रन्थान्ते "परे पूर्णम्" (8.34) इति सूत्रं द्विरावृत्य शास्त्रशेषः सूचितः।

एवं यद्यपि पाणिनिपिङ्गलयोः शास्त्रविषयाः सन्ति भिन्ना भिन्ना एव तथापि ग्रन्थविरचने ग्रन्थविन्यासे पिङ्गलच्छन्दःसूत्रे अष्टाध्यायीप्रतिविम्बनं दर्शं दर्शमष्टाध्यायीप्रभावः नूनमनुमीयते इत्यलम्।





**अनुशीलितग्रन्थसूची**


1. गङ्गादासः. *छन्दोमञ्जरी*. सम्पादकः- अनिलचन्द्रवसुः. कलिकाता, संस्कृतबुक् डिपो. 2010
2. चट्टोपाध्यायः,अशोकः. *वैदिक ओ लौकिक छन्दे पिङ्गल*. पश्चिमवङ्गराज्यपुस्तकपर्षद्, 1990.
3. धीरेन्द्रनाथः. *संस्कृत साहित्येर् इतिहास*. पश्चिमबङ्गमध्यशिक्षापर्षद् ,कलिकाता, 2000.
4. पिङ्गलः. *छन्दःशास्त्रम्*. सम्पादकः-अनन्तयज्ञेश्वरशर्मा. राष्ट्रियसंस्कृतसंस्थानम्, 2011
5. पाणिनिः. *अष्टाध्यायी*. सम्पादकः गोपालदत्तपाण्डेयः. चौखम्बा सुरभारती प्रकाशन, 1976
6. यास्कः. *निरुक्तम्*. तृतीयभागः, सम्पादकः-अमरेश्वरठक्कुरः. कलिकाता, कलिकाताविश्वविद्यालयः, 2003
7. Winternitz. *A History of Indian Literature*. Vol 1 , Part-1, Kol- Motilal Banarasi Das. 1959.
8. हालदारः,गुरुपदः. *व्याकरणदर्शनेर् इतिहास*. संस्कृत बुक् डिपो, कलिकाता, 2006.

# Post-colonialism in colonial system: An observation from Modern Sanskrit Stories

Dr. Santigopal Das
Assistant Professor, Dept. of Sanskrit,
Buniadpur Mahavidyalaya, WB

**Abstract**

'Post- colonial thought' is the new discussion element of this and upcoming centuries. 'Post – colonialism' does not mean here after colonial ages and thinking wordy, it indicates new thoughts from traditional activities, believes etc. Literature is the reflection of life and society. In modern Sanskrit literature we also find this conception. **Suchismita** in the story '*Bāndhabīrakṣitā*' of Sitanath Acharjya, Maiteyī in the story *'Maitreyī'* of Tarapada Bhattacharjya, **Sudeṣnā** in the story '*Saphalā Nārī*', **Imrana** in 'Imrānā vadāmyaham' of Narayanan Dash behave against this colonial system.

**Key words**

Post-colonial, Modern, Sanskrit, Story, Sitanath Acharya, Bāndhabīrakṣitā, Tarapada Bhattacharya, Kathādvādaśa, Maitreyī, Narayan Dash, Lajjā, Saphalā Nārī, Imrānā vadāmyaham.

**Introduction :**

The origin and development of modern Sanskrit stories basically divided in three stages: 1. the stories from 19$^{th}$ century to later period of this century 2. The stories before independence and 3. the stories of after independence. Here we see a clear difference from traditional writings. There are contemporary contents, new styles, new concepts, new values analytical discussions etc. in these. Here also we see reflection of the concept of post – colonial thought. Post- colonial thought is the new discussion element of this and upcoming centuries. Post - colonialism does not mean here after colonial ages and thinking wordy, it indicates new thoughts from traditional activities, believes etc. We find the concept everywhere from Vedic age to modern





Sanskrit literature. I will discuss here this briefly mentioning some incidents from modern Sanskrit stories and will show how the concept reflected against colonial or conservative system. We know literature is the reflection of society, life etc. In Vedic literature or in classical Sanskrit literature we also find this conception. In this connection we can mention the drama '***Mṛcchakaṭikam***' of ***Sudraka***, which is introduced by poet **Bhasa** in '*Cārudattam*'. Poet sketches the characters and story from daily life of that time. Basically in classical Sanskrit dramas we see the stories of kings, Gods etc. But the Poets write their dramas sketching the characters of lower classes. We surprised to see the love story of a prostitute **Vasantasena** with **Brahmin** *Cārudatta*. Thus poets make uniqueness by their post colonial thinking against colonial system. In the vast area of modern Sanskrit literature we also find this thinking. Sitanath Acharya's '*Bāndhabīrakṣitā*', Poet Tarapada Bhattacharjya's '*Maitreyī*', Poet Narayanan Das's 'Imrānā vadāmyaham', 'Saphalā Nārī' are mentionable stories in this discussion.

**Discussion**

'Bāndhabīrakṣitā' is a mentionable short story of modern Sanskrit literature. With this single creation Prof. Sitanath Acharjya becomes an well known short story writer. This story is rotated by two main characters **Suchismita** and **Madhumita**. We see school teacher **Suchismita** has a three years old daughter. Surprisingly we find her as unmarried. Poet narrates, when she was graduating, she falls in love with **Sudarsana**. But, suddenly when **Sudarsana** knows that she is pregnant, he denies accepting her child and forces her to abort pregnancy and if she does not do this he will not marry her – 'yadi garbhamocanaṁ na kriyate tarhi nāhaṁ twāṁ parineṣyami'. In the situation a young girl normally what can do? We find in herself an extraordinary womanhood. She decided to give birth of her child neglecting fear of conservative society or words of Sudarsana. Thus Poet creates uniqueness by such type of thinking.

Prof Tarapada Bhattacharya is a great story writer among twentieth and twenty first century poets of Bengal. His great creations are 'Gadādharavivāhakathā', 'Śaivalī', 'Maitreyī', 'Atha bhejālakathā', 'Rādhā', 'Viṣamapyamṛtam',

'Dwitīyapakṣaḥ' etc. 'Maitreyī'is a mentionable creation among the stories of 'Kathā dvādaśa'. 'Maitreyī' is an important woman character of the story. We see her relative parentless sister Mālatī stays at her home. After knowing and realizing the feelings of sister's affair with Anāthā, she decided to re-unite them. But, here the main obstruction was Anāthā's negligence to Mālatī. She contacts Anāthā and arranges her own marriage. But, at the auspicious time of marriage she escapes from there giving a letter to Anātha, where was her pray to accept her sister Mālatī as her wife – 'śraddhāspada, nāhaṁ tava hṛdayaṁ jāne, nāpi twaṁ jānāsi mama. ya punarekadā saraswatīkaṇṭhābharaṇadānacchalena tava kare kundakusumamālāmadāt, sa mālatī raktāmvaravasanā tava purata āste. tāṁ swikuru. cittena cittaṁ prāgeva militaṁ hastena hasto milatu'. But, how a woman can does such work without fearing of public censure or society? We know our society does not accept the re-marriage of a 'Lagnabhraṣṭā'. Poet thus expresses his thinking by sketching an open minded woman character, which reflects the concept.

Poet Narayan Dash's 'Saphalā Nārī' is one of the best creations among fifteen stories of 'Lajjā'. We see here **Sudesna**, wife of **Angaraja** distressed for a child, but she was unable for barrenness of her husband. Thus after long time with burdened mind she decided to birth her child with an obsolete way. She goes to sage **Dirghatama**'s hermitage and with logical discussion pray for a child by him – 'ekasya puruṣasya pārswe āgatāsti ekā nārī, tasyā manasi nāsti kasya api indriyalipsāyā hinakāmanāya vā paripuranābhilasa. Sā kevalam mātā bhavitumicchati'( Lajjā,p.27). After their physical attachment Sudesna becomes pregnant and feels happy. This story based on an upākhyāna of purāṇa. Thus a woman without fear of conservative society, religious rules and King's anger gives birth of a child.

We find this concept in Poet Narayan Dash's another short story 'Imrānā vadāmyaham'. A 26year old Muslim woman Imrānā is the central character of the story. One day in absence of husband her father - in law Alli Ahammed takes her in his bed by force and rapes her. In this pathetic situation her husband Nur Illahi refuses to accept her and the society orders her to obey the religious rules. She can't stay





again with her children and she should behave like mother with her husband for seven months. After this period she can live with her father-in law. Poet narrates some words by her which carries a new dimension against conservative thinking of that society or religion or believes. I am mentioning some words – 'maulānā muphtimahodaya ! ahaṁ dharmasyāndhakāre rājaniterāloko vā nāsmi. Aha ṁ kācid raktamāṁsaśarīradhārinī gṛhinī. Sarvavyāpako vāyurmama nihśwāsepi pracalati' (Lajjā, p.55). Thus we find the reflection of the concept of post-colonial thought in colonial system.

## Conclusion

Civilization changes by passing of time. With this change human values also change. We see the rise of new thoughts, logics etc. and this show in literature. Present century is the age of generosity. Theories and values are accepted by proper analysis. Those which are seems inhuman are rejected and for these we see the rise of new concepts like 'women empowerment', 'post-colonial thought' etc. There are some conditions to live in society, which we are force to follow. Some behaviour we should do and some should not. If we do not follow those, society will reject us. But, in this present age sometimes we see the protest against inhumanity. We see **Suchismita** in the story 'Bāndhabīrakṣitā', Maitreyī in 'Maitreyī', **Sudesn**ā in 'Saphalā Nārī', Imrānā in 'Imrānā vadāmyaham' behave against colonial system or conservative society or inhumanity or old values.

## References

*Adhunik Sanskrta Kathayen – sthiti aur pravrtti*: Edited by Archana Tiwari.(1st edition, 2011).Padmaja Prakasan,57,Vasanta Bihar, Jhansi, Allahabad – 211019. pp.25-120.

*Adhunik Samskrta Sahitya : Chotogalpa o Natak* : : Edt. By Rita Chattopadhyay.(1st edition, 2012).Progressive Publishers,37A,College street,Kolkata – 700073.

*A bibliography of modern Sanskrit writings*: Edited by Radhaballav Tripathi.(1st edition, 2012). Rastriya Samskrita Samsthanam, Navadehali. p. introduction1.

*Bisvi Satabdi ka Sanskrita Laghukatha - Sahitya*: edited by Ruchi Kulasrestha(1st edition, 2008). Rastriya Sanskrita Samsthan, Manit Viswavidyalaya,56-57,institutional area, Janakapuri, New Delhi – 110058. pp.1-30.

*KathādvāvaŚa* of Tarapada Bhattacharya : Published by Manabendu Banerjee, (1st edition, 2014).Sanskrit Sahitya Parishat,Kolkata.

*Lajjā* of Narayan Dash: Publisher – Smt. Sabita Das, Narendrapur, Kolkata - 700103

*Modern Sanskrit Literature :Tradition and Innovations* : Edited by S.B Raghunathacharya.(1st edition,2002.rpt.2009). Sahitya Academy, Rabindra Bhawan,35,Ferozeshah Road, New Delhi – 110001.

*Samskrita Sahityer Itihas* : Edited by Dhirendranath Bandyopadhya.(2nd edition,1st edition – 2000,rpt.2005).West Bengal State Book Board, Arya Manson(9th floor),6A Raja Subodh Mallik square, Kolkata – 700073.pp.459-476.






# वैदिककर्मणां मोक्षसाधनत्वपरीक्षणम्


Dr. Soma Bandyopadhyay

Assistant Professor

Kaliganj Govt College



**सन्दर्भसंक्षेपः**

वैदिककर्मणामग्निहोत्रादीनाम् अन्येषां वा विधिनियमान्वितकर्मणामुत्तरोत्तरं फलं परित्यागक्रमेण प्रवृत्तिमार्गनिवारणद्वारेण निवृत्तिमार्ग एव अवलम्ब्यते इति केषाञ्चिन्मतमत्र सम्यग् विवेच्यते। यागाख्यविषयेषु फलत्वात्तत्र काम्यविधीनामत्यागे न त्यागत्वम्। कर्मकाण्डस्य क्रमनिवृत्तौ तु चातुर्मास्ययागादीनामपि स्वर्गादिफलसाधनत्वेन, तत्त्यागान्निवृत्तिमार्गमवलम्ब्य मुक्तिः सम्भवति। अत्र याज्ञवल्क्यसंकेदश्चालोच्यते। कर्मणां बन्धहेतुत्वाद् मृत्युरूपत्वमुक्तम्। ज्ञानजन्ये मोक्षे मृत्योरतिक्रमणं कर्तव्यम्। तमेव विदित्वातिमृत्युमेति इति श्रुतिः। अतः उपनिषदि ज्ञानकर्मणोः समुच्चय एव मोक्षसाधनमित्युक्तम्। स्वर्गकामो यजेत इत्यादिविधिबलाद् फलं तु उपेक्षणीयम्। नित्यनैमित्तिकादीनां कर्मणामुच्छेदे केवलं यत् मोक्षजनकं कर्म तत्तु ज्ञानमेव। कर्मणः मोक्षसाधनत्वं नास्तीति मोक्षस्य कर्मफलमपि शङ्करपादैः निराकृतम्। ज्ञानस्यैव अज्ञानविरोधित्वान्मोक्षफलम् इति श्रुतिसिद्धान्तः।


**कूटशब्दाः**– *वेदः, उपनिषद्, कर्म, मोक्षः, यागः।*

अत्र केचित् एवमाक्षिपन्ति यत्, वैदिकं यागादिकं कर्म स्वर्गादिफलसाधकमपि निवृत्तिद्वारा वस्तुतो मोक्षप्रापकमेव भवेत्। तथाहि तेषां मते श्रौतं सर्वविधं कर्म निवृत्तिसाधनमेव भवति। यथा स्वर्गकामवाक्येन देहात्मत्वनिवृत्तिर्बोध्यते। यतोहि देहादेरात्मत्वं मन्यमानः न कोऽपि जन्मान्तरलभ्यस्वर्गाय प्रयतेत। नित्यनैमित्तकविधीनां च स्वाभाविकप्रवृत्तिनिरोधेन बहिर्विषयेषु अनासक्तिरेव स्यात्। तथा वेदबोधितनिषेधेषु च साक्षादेव निरुध्यन्ते प्रवृत्तयः। एवं काम्यविधयोऽपि उत्तरोत्तरं सातिशयं फलं बोधयन्तः पुरुषं तेभ्यस्तेभ्यो निकृष्टेभ्यः पदेभ्यो मोचयन्त्येव, एतच्च आप्राजापत्यपदप्राप्तेः। एवम् प्रासादारोहणन्यायेन पूर्वां पूर्वामवस्थाम् विमुच्य यत् अत्युत्कृष्टहिरण्यगर्भपदं लभते तदपि मुक्तिरेव। अतः शास्त्रीयाणि कर्माण्येव सम्पाद्य उत्तरोत्तरम् कार्यकारणसंघातवन्तम् अतिशययुक्तं फलम् लभ्यमान एव पूर्वस्मात् संघातात् मुच्यते इत्येवं समग्रस्यैव कर्मकाण्डस्य निवृत्तिपरत्त्वं निवृत्तिपरत्वाच्च मोक्षप्रतिपादकत्वं सेत्स्यति। तत्रोत्तरोत्तरं सातिशयं फलं यत् हैरण्यगर्भं पदं तदपि पूर्वव्यावृत्तिद्वारा मोक्षं व्यवस्थापयितुमर्हति। न तु तत्रैव तादृशकर्मणां प्राजापत्यादिपदलाभमात्रे तात्पर्यम्। यतः 'अपामसोमममृता अभूम'[1] 'असंख्यं ह वै चातुर्मास्यमाजिनः सुकृतं भवति'[2] इत्यादिश्रुतेः अमृतं मोक्षभूतं निरतिशयफलमेव हि कर्मणां चरमं लक्ष्यम्। प्राजापत्यपदसम्पत्तावपि निरतिशयफलत्वाभावात् न तावन्मात्रमेव कर्मणां फलं भवितुम् अर्हति। अतः पूर्वं पूर्वं पदं परित्यज्य उत्तरम् उत्तरम् उत्कर्षम् समधिगच्छभ्यः तन्निवृत्तिद्वारा मुक्त्यर्थमेव तत्तत् फलं प्रतिपद्यते न तु तत्तत्पदप्राप्त्यर्थमात्रे वाक्यं पर्यवसितम्। अतएव अद्वैतक्षयात् वेदबोधितः सर्वोऽपि फलविशेषः अनित्यतया मृत्युना ग्रस्तत्वात् मोक्षार्थं एव प्रतिपद्येत। हिरण्यगर्भपदप्राप्त्यनन्तरं ब्रह्मात्मैक्यबोधात् सर्वात्मत्वप्राप्त्या द्वैतक्षये तु वस्तुतो मृत्योराशिमतीत्य अद्वैतरूपेण स्थितो मुक्तो भवति। अतः मनुष्यभावादूर्ध्वम् अर्वाक् च परमात्मभावात् मध्ये या या तत्तत्पदप्राप्तिः सापि मुक्तिपदवाच्या भवति अन्तराले। सा च मुक्तिः गौणी भवति आपेक्षिकत्वात्। पूर्वपूर्वदेवात्मभावमपेक्ष्यैव उत्तरोत्तरदेवात्मभावस्योत्कृष्टत्वात् तद्भावपत्तिरूपा मुक्तिरौपचारिकी एव गृह्यते। वास्तवी मुक्तिर्हि काञ्चित् अपि देवात्मभावपत्तिं नापक्षते, 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति'[3] इति श्रुतेः अत्र तु हिरण्यगर्भपदप्राप्तिरूपां गौणीमपि

1 ऋक्संहिता ८.४८.३
2 शतपथब्राह्मणम् २.६.३.१
3 बृ.उ. ४.४.६





इमामान्तरालिनीं (मध्यवर्त्तिनीं) मुक्तिं द्वारीकृत्यैवान्ते परमार्थाद्वैतभावात्मिका पारमार्थिकी मुक्तिर्लभ्यते। तस्मात् पूर्वपूर्वदेवात्मभावं परित्यज्य उत्तरोत्तरदेवात्मभावं प्रतिपाद्य अन्ततो गत्वा द्वैतक्षयान्तरं परामेव मुक्तिं सम्पादयति श्रुतिविहितमेव कर्मेति वक्तव्यम्। भगवता शङ्कराचार्येण मतमेतद् अस्वरसतया समुपस्थापितम् बृहदारण्यकोपनिषद्भाष्ये—'केचित्तु सर्वमेव निवृत्तिकारणं मन्यन्ते। अतश्चापेक्षिकी गौणी मुक्तिरन्तराले[4]' इति तद् अत्र विपक्षिणामभिप्रायः स्पष्टमेवोद्बोधितः श्रीमदानन्दगिरिपदेनापि स्वव्याख्यायाम्— स्वर्गकामवाक्ये देहात्मनिवृत्तिर्गोदोहनवाक्ये स्वतन्त्राधिकारनिवृत्तिर्नित्यनैमित्तिकविधिष्वर्थान्तरोपदेशेन स्वाभाविकप्रवृत्तिनिरोधो निषेधेषु साक्षादेव नैसर्गिकप्रवृत्तयो निरुध्यन्ते तदेवं सर्वमेव कर्मकाण्डं निवृत्तिद्वारेण मोक्षपरमित्यर्थः। .... यस्मात् पूर्वं पूर्वं परित्यज्योत्तरमुत्तरं प्रतिपद्यमानस्तत्तन्निवृत्तिद्वारा मुक्त्यर्थमेव तत्तत् प्रतिपद्यते, न तु तत्तत्पदप्राप्त्यर्थमेव वाक्यं पर्यवसितं तस्यान्तवत्त्वेनाफलत्वात्। तस्मात् द्वैतक्षयपर्य्यन्तं सर्वोऽपि फलविशेषो मृत्युग्रस्तत्वात् प्रासादारोहणन्यायेन मोक्षार्थोऽवतिष्ठते। हिरण्यगर्भपदप्राप्त्या देवक्षये तु वस्तुतो मृत्योराशिमतीत्य परमात्मरूपेण स्थितो मुक्तो भवति। तथा च मनुष्यभावादूर्ध्वम् अर्वाक् च परमात्मभावान् मध्ये या तत्तत्पदप्राप्तिः सा खलु आपेक्षिकी सती गौणी मुक्तिर्मुख्या तु पूर्वोक्तैऽवत्यर्थः[5]। किं बहुना, बृहदारण्यकश्रुतयोऽपि कथञ्चिदस्मिन्नेवार्थे विश्राम्यन्ति इव। तथाहि तत्रैवं श्रूयते यत्, विदेहराजो जनकः कदाचित् कस्मिंश्चिदधिष्ठाने बहुदक्षिणं यज्ञं समारब्धवान्। तस्मिन् यज्ञे समुपस्थितानां ब्राह्मणानां मध्ये कस्तावत् ब्रह्मज्ञः इत्याविष्कर्त्तुं प्रतिशृङ्गं पञ्चपादसुवर्णेन मण्डितीकृत्य गवां सहस्रं दानरूपेणोपस्थाप्य ब्राह्मणानुवाच— हे ब्राह्मणाः, भवतां मध्ये यस्तावत् ब्रह्मवित्तमः स एव एतद् गोसहस्रं गृह्णातु, नान्यः। एवमुक्तवति जनके याज्ञवल्क्यः तद्गोसहस्रं गृहं नेतुं तदीयं शिष्यमादिदेश। तदेतद् याज्ञवल्क्यस्य साहसम् असहमानानां ब्राह्मणानां मध्ये जनकस्य होता अश्वलो याज्ञवल्क्यस्य ब्रह्मज्ञत्वं परीक्षितुं पृष्टवान् 'याज्ञवल्क्येति होवाच[6]' इति। अस्य आश्वलायनप्रश्नस्योत्तरं दातुं याज्ञवल्क्येनोक्तम्— 'होत्रेति[7]'। तस्यैव व्याख्या याज्ञवल्क्यमुखेन स्वयमेव श्रुतौ उपस्थाप्यते वाग्वै

4 बृ.उ.भाष्यम्, ३.२ (आभासभाष्यम्)
5 बृ.उ. ३.२ (आभासभाष्यम्– आनन्दगिरिः)
6 बृ.उ. ३.१.३
7 तत्रैव

यज्ञस्य होतेत्यादिवाक्यैः। अयमभिसन्धिरत्र— वागिन्द्रियमेव हि यजमानरूपस्य यज्ञस्य होता भवति 'यज्ञो वै यजमानः[8]' इति श्रुतेः। यज्ञस्य यजमानरूपत्वात् वागिन्द्रियस्य होतृत्वमिति वाचोऽध्यात्मत्वभावना। तत् कथमुपपद्यत इत्यत आह श्रुतिः— 'तद्येयमिति। येयं यजमानस्य वाक् सैव तदधिष्ठातृरूपा अग्निदेवता। अग्निर्वाग्भूत्वा मुखं प्रविशत्[9]' इत्यादिश्रुतेः। एतेन वागिन्द्रिये अग्निदेवतारूपेण भावना कर्तव्येति देवतोपासनरूपं दर्शनमुक्तं भवति, 'अग्निर्वै होता[10]' इति श्रुतेः। तदेतत् अधियज्ञम् होतेति साधनम्, अध्यात्म्या वागिति साधनम् इति यत् साधनद्वयं परिच्छिन्नतया प्रसिद्धं लोके तत्तु मृत्युरूपेण स्वाभाविकाज्ञानासङ्गप्रयुक्तेन कर्मणा वशीकृतम्। तत्र वागिन्दियस्य दयभेदेनाग्निदेवतारूपेण भावनं तदेवातिमुक्तिसाधनम्। अर्थात् वागृत्विग्रूपयोः साधनयोरग्निदेवतात्वदृष्टिरेव मुक्तिसाधनम्। यतो हि साधनद्वये अग्निदृष्टिमात्रेणैव यजमानः स्वाभाविकाज्ञानासङ्गरूपमृत्योर्मुच्यते। अतः स होता अग्निरूपेणोपासनाविषयः सन् मुक्तिः मुक्तिसाधनं भवतीत्यर्थः। या चाग्निदृष्टिरूपा मुक्तिः सैवातिमुक्तिं अतिमुक्तिसाधनम् इत्यर्थः। अतिमुक्तिश्चात्र अग्निदेवतात्मभावापत्तिः। सा चातिमुक्तिं होतृमाग्रूपस्य परिश्छिन्नस्य साधनद्वयस्य या अपरिश्छिन्नाग्निदेवतारूपेण भावना तद्रूपया मुक्त्या उपपद्यते। अतोऽत्राग्निदेवदृष्टिरूपमुक्तेरतिमुक्तिसाधनत्वमपि संगतमेवेति मुक्त्यतिमुक्त्योः साध्यसाधनभावोऽपि सूपपद्यते। अनया रीत्या अधियज्ञाध्यात्मभूतयोः अध्वर्य्युचक्षषोः परिश्छिन्नयोः साधनयोरपरिश्छिन्नाधिदेवतादित्यरूपेण भावना मुक्तिः, आदित्यदेवभावापत्तिश्चातिमुक्तिर्भवति। एवम् उद्गातृप्राणयोः साधनयोरधिदेवतावायुरूपेण दर्शनं मुक्तिः, अपरिश्छिन्नवायुभावापत्तिश्च अतिमुक्तिं तथा ब्रह्मामनोरूपपरिश्छिन्नसाधनद्वयस्य अपरिश्छिन्नचन्द्रत्वदृष्टिर्मुक्तिः, चन्द्रभावापत्तिश्चातिमुक्तिः। सर्वत्रैव चात्र मुक्तिशब्दस्य मुक्तिसाधनपरत्वम्, अतिमुक्तिशब्दस्य च तत्फलपरत्वमवगन्तव्यम्। एतदेव प्रतिपिपादयिषति श्रुतिः 'सा मुक्तिः सातिमुक्तिः[11]'। उद्गीथब्राह्मणे चोक्तम्— 'मृत्युरतिक्रान्तो दीप्यते[12]' इति।

8 बृ.उ. ३.१.३ (शाङ्करभाष्यधृतश्रुतिः)
9 ऐतरेयोपनिषत् १.२.४
10 बृ.उ. ३.१.३ (शाङ्करभाष्यधृतश्रुतिः)
11 बृ.उ. ३.१.३,४,५,६
12 बृ.उ. उद्गीथब्राह्मणम्





सकलमेतदभिप्रेत्यैव समाम्नातम् अश्वलयाज्ञवल्क्ययोः प्रश्नोत्तरसमुल्लेखमुखेन बृहदारण्यकोपनिषदि— 'याज्ञवल्क्येति होवाच— यदिदं सर्वं मृत्युनान्तं सर्व्वं मृत्युनाभिपन्नम्, केन यजमानो मृत्योराप्तिमतिमुच्यत इति। होत्रर्त्विजाग्निना वाचा, वाग्वै यज्ञस्य होता तद् येयं वाक् सोऽयमग्निः स होता स मुक्तिः सातिमुक्तिः'। 'यदिदं सर्व्वमहोरात्राभ्यामाप्तं सर्व्वमहोरात्राभ्यामभिपन्नं, केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्य्युणर्त्विजा चक्षुषादित्येन, चक्षुर्वै यज्ञस्याध्वर्य्युस्तद्यदिद् चक्षुः सोऽसावादित्यः सोऽध्वर्य्युः सः मुक्तिः सातिमुक्तिः।

'यदिदं सर्व्वं पूर्व्वपक्षापरपक्षाभ्यामाप्तं सर्व्वं पूर्व्वपक्षापरपक्षाभ्यामभिपन्नं, केन यजमानः पूर्व्वपक्षापरपक्षयोराप्तिमतिमुच्यत इति। उद्गात्रर्त्विजा वायुना प्राणेन, प्राणो वै यज्ञस्योद्गाता, तद् योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः सातिमुक्तिः।'

'यदिदमन्तरिक्षमनारम्बणमिव, केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति। ब्रह्मणर्त्विजा मनसा चन्द्रेण, मनो वै यज्ञस्य ब्रह्मा, तद् यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यतिमोक्षाः[13]।'

अयं भावः— कर्मणां बन्धनहेतुत्वात् मृत्युरूपत्वमेव विवक्षितमौपनिषदिकैः। अतः केवलकर्मिभिर्नैव मृत्योरतिक्रमो भवति, किन्तु किञ्चित्तत्त्वदर्शनसमुत्थितेन कर्मणा मृत्योः अत्ययो भवतीति दर्शितं बृहदारण्यकोपनिषदि। तत्र मधुकाण्डे मुख्यप्राणात्मदर्शनेन मृत्योरतिमुक्तिरुक्ता, मुनिकाण्डे तु वागादेरग्न्याद्यात्मत्वदर्शनेनैव मृत्योरतिमुक्तिराम्नातेति विशेषः।

तदेवमत्र श्रुतिषु तत्तद्देवतोपासनासहितेन यज्ञकर्मणा तत्तद्देवतात्वप्राप्तेर्मुक्तित्वाभिधानात् ज्ञानकर्मसुचयस्यैव मुक्तिसाधनत्वमिति मीमांसकमतानुकूल्यमेव क्रियते इति आपाततः प्रतीयते।

अस्यायमेवान्तर्निहितोऽर्थः, कर्म स्वभावतः संसारफलकमपि विद्यासहितं सत् निरभिसन्धिक्रियमाणं विषदधिन्यायेन संसारोच्छेदकमेव मोक्षसाधकमेव वा भवेत् इति ज्ञानकर्मसुचयवादिनां मतम्। विषं हि स्वभावात् प्राणहरं, दधि च ज्वरकरं भवति। परन्तु तदेव गरलं मन्त्रादिसंयुक्तं सत् प्राणदं स्यादित प्रसिद्धमेव वैद्यकभेषजतत्त्वे। तथा दध्यपि शर्करादिविमिश्रितं पुष्टिजनकम् भवति, तथा च वैयाकरणमुदाहरणम्— 'स्थूलं करणं दधि इति'।

13 बृ.उ. ३.१.३-५

अनयैव रीत्या कर्मणो विद्यासहितत्वे संसारोश्छेदमुखेन मुक्तिरेव लभ्यते इति ज्ञानकर्मसमुच्चयस्यैव मोक्षसाधनत्वम्। एतावता मोक्षस्य सविद्यकयज्ञादिकर्मफलत्वं यथा सिध्यति तथा नित्यकर्मफलत्वमपि उपपद्यतेतराम्। तथाहि त्रिविधान्येव वैधकर्माणि— नित्यानि, नैमित्तिकानि, काम्यानि चेति। तत्र नियतनिमित्तत्वे सति त्वकरणे प्रत्यव्ययजनकानि करणे तु फलविशेषाजनकानि (दृष्टफलासाधकानि), दोषक्षयार्थं वा वेदेचोदितानि कर्माणि 'स्वाध्यायोऽध्येतव्यः[14]' इत्यादीनि नित्यानि। अनियतनिमित्तत्वे सति करणे फलविशेषजनकानि, अकरणे तु पापसम्पादकानि वेदविहितानि जातेष्ट्यादीनि कर्माणि नैमित्तिकानि। दृष्टफलमुद्दिश्य विहितानि अकरणे पापाजनकानि वैदिकानि चित्रादीनि कर्माणि काम्यानि। तत्र नैमित्तिकानां कर्मणां जातेष्ट्यादीनां पूतत्वतेजस्वितादिकं वा दोषक्षपणादिकं वा फलम्। काम्यानां स्ववाक्यबोधितं फलम्। यत्र पुनस्तन्न दृश्यते तत्रार्थवादिकं फलम्। तदपि यत्र नोपलभ्यते तत्र विश्वजिन्न्यायेन स्वर्गः फलत्वेन मन्व्यते, 'स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्[15]' इति पारमर्शसूत्रात्। तत्र पुनः विश्वजिद् यागो द्विविधो दृश्यते— एकः प्रायश्चित्तरूपः, इतरश्च एकाहकाण्डपर्वितः। तत्र एकाहकाण्डपर्वितस्यैव फलं स्वर्गं इति विचार्य्य निर्धारितं कल्पतरुभामतीटीकायाम्। अपच्छेदन्यायगतो विश्वजिद्यागः प्रायश्चित्तरूपेण विहितत्वात् नैमित्तिकः। अतो न तत्र स्वर्गः फलत्वेन कल्प्यते। एकाहकाण्डपर्वितस्तु विश्वजित् न नित्यः शब्दस्य नित्यत्वबोधकस्य तत्राभावात्, काम्यप्रकरणकल्पितत्वाश्च। ततश्च निष्फले कर्मणि पुरुषस्य प्रवृत्त्ययोगात् तत्र स्वर्ग एव विश्वजिन्न्यायेन फलत्वेनोपस्थाप्यते, पुरुषप्रवृत्तिसिद्ध्यर्थम्। यत्र तु कारणस्य कार्य्यस्य वा सम्भाव्यमानानि कार्य्याणि कारणानि वा अन्यथासिद्धानि तत्र यत् परिशिष्यते तदेव तस्य कार्य्यं कारणं वेति अर्थापत्त्या समुपलभ्यते। अयमत्रैव हि पारिशेष्यन्याय इति ध्येयम्।

नित्यानां कर्मणां तु विश्वजिन्न्यायेन फलं कल्पयितुं न शक्यते, यथोक्तेन हेतुना तेषां तन्न्यायविषयत्वात्। न च तेषां किमपि स्ववाक्यपठितं फलम्, आर्थवादिकं वा फलं विद्यते। अथ च पुरुषप्रवृत्तिसिद्धये तेषां किमपि फलमवश्यं कल्पनीयम्। ततश्च तेषां काम्यकर्मवत् फलस्याश्रुतत्वात् नैमित्तिकवश्च फलाभावात् मोक्ष एव फलं भवितुमर्हति। यतः स एव परिशिष्यते।

14 तै.आ. २.१५
15 बृ.उ. ३.३ (आभासभाष्यानन्दगिरिधृतवचनम्)





मोक्षश्च वेदविदामिष्टः फलत्वेन। तस्मान्मोक्ष एव नित्यकर्मफलत्वेन शक्यमभ्युपगन्तुम्। तदुक्तं भगवच्छङ्करपादैः पूर्वपक्षग्रन्थे— 'सर्वेषां हि कर्मणां सर्वं फलम्'। न चान्यत् इतरकर्मफलव्यतिरेकेण फलं कल्पनायोग्यमस्ति परिशिष्टश्च मोक्षः… तस्मात् स एव कल्पयितव्यः[16] इति।

अयमाशयः— यस्य किल कर्मणः फलं विधिवाक्येनार्थवादवाक्येन वा न श्रूयते, नापि श्रुतार्थापत्त्यापि अवधार्य्यते, तादृशस्य कर्मणः काम्यकर्मान्तरसादृश्यात् स्वर्ग एव फलं कल्प्यते इति विश्वजिन्न्यायस्य गूढार्थः। 'विश्वजिता यजेत' इति श्रुत्या विश्वजिद्यागस्य विधानेऽपि अर्थवादेन, विधिना वा फलस्यानुक्तत्वात् स्वर्ग एव फलं तस्य कल्प्यते इति मीमांसकानां राद्धान्तः। यद्यपि श्रुतिविहितानि काम्यातिरिक्तानि नित्यानि नैमित्तिकानि च कर्माणि सन्ति, तथापि 'अहरहः सन्ध्यामुपासीत' इत्यादिनित्यकर्मसु तथा 'दशमेऽहनि पिता नाम कुर्य्यात्' इति नामकरणादिनैमित्तिककर्मसु नैव विश्वजिन्न्यायावसरः, नित्यानामफलत्वस्येष्टत्वात्, नामकरणादीनाञ्च नैमित्तिकानां पूतत्वादिसंस्कारफलस्य श्रुतत्वात्। नन्वकरणे प्रत्यवायफलकानां नित्यानां कर्मणां मास्तु विश्वजिन्न्यायेन स्वर्गफलकत्वम्, तथापि पारिशेष्यन्यायेन मोक्ष एव नित्यकर्मणां फलमस्तु। न हि किञ्चित् कर्म वेदेन विहितमपि स्यात्, अफलमपि स्यादिति भवितुमर्हति विरुद्धत्वात्, 'स्वाध्यायोऽध्येतव्यः[17]' इत्येवं विधिना विहितानां नित्यकर्मणामपि सफलत्वविधानात्। तस्मान्नित्यानामपि कर्मणां केनचित् फलेनावश्यमेव भवितव्यमिति स्थितम्। कामनाविषयीभूतानां स्वर्गादिफलानां काम्यकर्मफलत्वेनावधारणात्, नैमित्तिकानाञ्च नामकरणादीनां पूतत्वादिफलकत्वनिर्धारणात् न तयोः फलत्वेन कथमपि गणयितुं शक्यते मोक्षः। तत्रानुप्रवेशासम्भवात् इति स एव एकं फलमवशिष्यत इति अत्रैव पारिशेष्यन्यायस्यावतारः। कर्मत्वसामान्येन नित्यानां कर्मणां किञ्चित् फलकत्वेन सफलत्वं व्यवस्थापनीयमिति परिशिष्टत्वात् मोक्ष एव नित्यकर्मणां फलमस्तु इति महती विप्रतिपत्तिः।

तत्रोच्यते— अनन्तपुरुषसाध्यानां कर्मव्यक्तीनामनन्तत्वात् अनन्तपुरुषगतानां कामनानामपि अनन्तत्वात् तद्विषयीभूतानां फलानामपि आनन्त्यमनिवार्यम्। आनन्तदोषावहत्वाश्च एतेषां कर्मणामेतावन्ति फलानीतीयत्तायाः

16 बृ.उ. ३.३ (आभासभाष्यम्)
17 तै.आ. २.१५

अवधारयितुमशक्यत्वात् मोक्षरूपं फलं कथं परिशिष्यते इति मोक्षे नैव पारिशेष्यन्यायावतारः। अयं भावः— कर्मफलव्यक्तीनामानन्त्यात् पारिशेष्यन्यायानुपपत्तेः कथमत्रार्थापत्त्या मोक्ष फलत्वेन कल्पयितुं शक्यते? परमतेऽपि मोक्षस्य नित्यकर्मफलत्वाभ्युपगमे कर्मफलसाजात्येन पारिशेष्यं नोपपद्यते। अपि च अर्थापत्तिं प्रति अन्यथोपपत्तेर्बाधकत्वात् नात्र प्रसरेदर्थापत्तिः। उत्पत्त्याप्तिविकारसंक्षाराणाम् अन्यतमस्यैव नित्यकर्मफलत्वात् अन्यथोप्युपपत्तेः निर्बीजत्वात् अर्थापत्तिरेवात्र न समुदियात, कुतः अर्थापत्त्या मोक्षस्य पारिशेष्यापत्तिः? तदुक्तं पुनः भगवत्पादैः— 'तस्मादन्यथाप्युपपत्तेः क्षीणा श्रुतार्थापत्तिः[18]'। तथाहि कर्मफलानि एतावन्ति, इदञ्चास्य कर्मणः फलम्, इदञ्चास्य तत् साधनम् इत्येवं विज्ञाते एव पारिशेष्यं सिध्यति। न त्वेतदिह सम्भवति। पुरुषेच्छाविषयाणां कर्मफलानां, तत्साधनविशेषाणां पुरुषेच्छानां वा एतावत्त्वं न केनापि कथमपि ज्ञातुं शक्यते। किञ्च प्रतिप्राणि इच्छावैचित्र्येण तदानन्तमिति प्राणिनां समष्टिरूपेण, व्यष्टिरूपेण च इच्छान्त्यम्, ततश्च फलसाधनानामनन्त्यम्। तेन च तत्र फलानन्त्यम् नापलपितुं शक्यते। अतएवात्र पारिशेष्यं न सिद्ध्यति। तस्मात् पारिशेष्यन्यायेन मोक्षस्य नित्यकर्मफलत्वमिति यदुक्तं विवादिभिस्तन्न युक्तम्। ननु इच्छाविषयाणां तत्साधनानां आनन्त्येऽपि कर्मफलत्वरूपेण अनुगतेन धर्मेण तेषां सर्वेषां फलानां संग्रहसम्भवात् तद्भिन्नत्वेन मोक्षस्य पारिशेष्यम् अलं निश्चेतुमिति चेन्मैवम्। मोक्षस्य नित्यकर्मफलत्वे अभ्युपगम्यमाने तस्य कर्मफलसाजात्यमेवाभ्युपेतं भवति इति न तस्य तद्भिन्नत्वम्, अतो न पारिशेष्यम्।

किञ्च मोक्षस्य कर्मफलत्वे कर्मजन्यत्वेन स्वर्गादिवत् तस्य अनित्यत्वापत्तिर्दुर्निवारा[19]। वस्तुतस्तु मोक्षस्य फलत्वमेव न युज्यते साध्यत्वाभावात्। यद्धि साध्यम् तदेव फलमिति साध्यत्वफलत्वयोर्व्याप्तेरवधारणात्। किञ्च चतुर्विधानां निर्वर्त्त्यविकार्यप्राप्यसंस्कार्याणां कर्मफलत्वेन प्रसिद्धानां मध्ये मोक्षस्य अन्तर्भावासम्भवात् न तस्य मोक्षस्य कर्मफलत्वकल्पना समीचीना। न हि मोक्षः निर्वर्त्त्यः उत्पाद्यो वा आत्मस्वरूपस्य तस्य नित्यत्वेन अनुत्पाद्यमानत्वात्। नापि प्राप्यः आत्मभूतस्य तस्य नित्यप्राप्तत्वात्। नापि विकार्यः कूटस्थनित्यत्वेन तस्य अपरिणामित्वात्। नापि संस्कार्यः निर्दोषस्य निर्लेपस्य च आत्मनः दोषापनयनासम्भवात्, निर्गुणस्य च तस्य गुणान्तराधानासम्भवात्। तस्मान्न कर्मसाध्यो मोक्षः। अपि च कर्मणः

18 बृ.उ. ३.३ (आभासभाष्यम्)

19 अस्यानुध्वनिः आचार्यकृतसमन्वयसूत्रभाष्येऽपि परिलक्ष्यते– 'अतस्तत् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद्यदि कर्त्तव्यशेषत्वेन उपदिश्यते, तेन च कर्त्तव्येन साध्यश्चेन्मोक्षः अभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्षः प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते, अतो न कर्त्तव्यशेषत्वेन ब्रह्मोपदेशः युक्तः'। (शाङ्करभाष्यम्, पृ. १२१)





अधिकारिसापेक्षत्वेन अधिकारस्य च अज्ञानमूलकत्वेन कर्मणश्च अज्ञानमूलकत्वात् न अज्ञाननाशकत्वम्। न हि देहादौ आत्माध्यासं विना अनध्यस्तब्राह्मणत्वादिभावस्य कस्यचिदपि पुरुषस्य कर्माधिकारः सम्भवति। तस्मात् अज्ञानाविरोधित्वात् कर्मणः न अज्ञाननाशकत्वम्। अयमाशयः— आत्मस्वरूपस्य अभिव्यक्तिं विना, अविद्यायाः निवृत्तिं च व्यतिरिच्य कस्यापि न मुक्तिं सम्भाव्यते। कर्मणस्तु अविद्यासम्भूतत्वात्— अविद्याम् उपजीव्यैव सर्वेषां लौकिकानां वैदिकानां च कर्मणां समुद्भवात्, 'यदुपजीव्य यत् सिध्यति न हि तत् तस्य व्याघातकमि'ति न्यायेन नैव कर्मणा स्वोपजीव्याविद्यायाः नाशः कदापि भवितुमर्हति। किन्तु केवलं ज्ञानेनैव अज्ञाननाशः। आत्मस्वरूपानभिव्यक्तिर्हि अज्ञानम्, ज्ञानन्तु आत्मस्वरूपाभिव्यक्तिरिति ज्ञानाज्ञानयोर्विरोधेन मिथः बाध्यबाधकता सम्भवति। कर्मणस्तु आत्मस्वरूपानभिव्यक्तिरूपत्वात् नास्ति कर्मणा विरोधः इति नैव कर्म खलु बाधकम् अज्ञानस्य। अतः कर्मणः मोक्षसाधनत्वकल्पना खपुष्पायते एव। तत् एतत् आवेदितं भगवता शङ्करेण— 'अज्ञानव्यवधाननिवर्त्तकत्वात् ज्ञानस्य, मोक्षो ज्ञानस्य कार्यमित्युपचर्यते, न तु कर्मणा निवर्त्तयितव्यम् अज्ञानम्।… अनभिव्यक्तिरज्ञानम् अभिव्यक्तिलक्षणेन ज्ञानेन विरुध्यते, कर्म तु नाज्ञानेन विरुध्यते, तेन ज्ञानविलक्षणं कर्म। यदि ज्ञानाभावः, यदि संशयज्ञानम्, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति, सर्वं हि तज्ज्ञानेनैव निवर्त्त्येत, न तु कर्मणा, अन्यतमेनापि विरोधाभावात्[20]'।

एतावता मोक्षस्य कर्मफलत्वमेव निराकृतं भवति इति का प्रत्याशा नित्यकर्मफलत्वे मोक्षस्य? अथोच्येत 'अविद्यास्तमयो मोक्ष सा च बन्ध उदाहृतः[21]' इति वार्त्तिककारीयवचनात् अविद्यानाशरूपबन्धनिवृत्तिः कृतिसाध्यैव इति कर्मसाध्यत्वम् मोक्षस्य इति। तदपि न पेशलम्। न हि कर्मशतैरपि अविद्यायाः नाशः शक्यम् कल्पयितुम् अविद्यामूलकत्वात् कर्मणः अविद्यया अविरोधाच्च। ज्ञानस्यैव हि अज्ञानविरोधित्वात्, अज्ञाननाशकत्वम् युज्यते। तथा च श्रुतिः—

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे[22]'।

20 बृ.उ. ३.३ (आभासभाष्यम्)

21 सुरेश्वराचार्यकृतं वार्त्तिकवचनम्

22 मुण्डकोपनिषत् २.२.८

## परिशीलितग्रन्थसूची


१. ऋक्संहिता, मोक्षमूलरसंस्करणम्, १९६६।

२. ऐतरेयोपनिषत्, वाराणसीप्राच्यभारतीसंस्करणम्, १९६५।

३. ऐतरेयभाष्यम्, शङ्कराचार्यः, दुर्गाचरणसांख्यतीर्थसम्पादकम्।

४. शतपथब्राह्मणम्, शङ्कराचार्यः, मुम्बाईनिर्णयसागरसंस्करणम्, १९३८।

५. तैत्तिरीयारण्यकम्, आनन्दाश्रमः, १९२५।

६. तैत्तिरीयोपनिषद्, वाराणसी प्राच्यभारती।

७. बृहदारण्यकभाष्यवार्त्तिकम्, सुरेश्वराचार्यः, आनन्दाश्रमसंस्करणम्, १८९४।।

८. मुण्डकोपनिषद्, विज्ञानभिक्षुः, वाराणसीचौखम्बासंस्करणम्, १९३५।

९. बृहदारण्यकभाष्यवार्त्तिकम्, सुरेश्वराचार्यः, आनन्दाश्रमसंस्करणम्, १८९४।

१०. बृहदारण्यकभाष्यानन्दगिरिटीका, आनन्दगिरिः, दुर्गाचरणसांख्यतीर्थसंस्करणम्, १३७१ बङ्गाब्दः।

११. बृहदारण्यकोपनिषद्, वाराणसीप्राच्यभारतीसंस्करणम्, १९६५।

१२. बृहदारण्यकोपनिषद्भाष्यम्, शङ्कराचार्यः, पुण्यपत्तन-आप्टेकर-वाग्मानीप्रकाशनम्, १९१८।






# वैज्ञानिके युगेऽपि पुराणस्योपयोगिता

**प्रवीणचन्द्र–उपाध्यायः**

वेदेषु येषामाध्यात्मिकाधिदैविकाधिभौतिकबौद्धिकव्यावहारिकनैतिक–सांस्कृतिकदेवमानुषजड़चेतनात्मकानां विषयाणां सूक्ष्मरूपेण विधानं विद्यते, ब्राह्मणभागे, आरण्यके, स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, तेषां सर्वप्रकाराणां विषयाणां पुराणेषु आर्कषक–बुद्धिगम्यमनोग्राह्योपदेशप्रदकथानकरूपेण वर्णनं कृतमस्ति । पुराणेषु न केवलमाचारव्यवहारदैनिकक्रियामात्रस्योल्लेखोऽस्ति, किन्तु मानवजीवनो–पयोगिनीनां विविधानां भावनानां पूर्णं विवेचनं विद्यते । अतः पुराणानामध्ययनेन वेदार्थनिधीनामुपलब्धिर्भवितुमर्हति । पुराणाध्ययनं विना यथार्थज्ञानं मानवीयजिज्ञासाया पूर्तिश्च न सम्भवति । पुराणेषु मानवोपयोगितानां समस्तज्ञानक्षेत्राणां समावेश उपलभ्यते। तदुक्तं स्कन्दपुराणे–

**पुराणमखिलं तात सर्वशास्त्रमयं स्मृतम्[1] ।**

पद्मपुराणे तु स्पष्टमुल्लिखितं विद्यते यद् येन पुंसा वेदस्यान्यशास्त्राणां चाध्ययनं कृतं, किन्तु यदि पुराणानामनुशीलनं न विहितं तर्हि तेनोत्तमं ज्ञानं प्राप्तुं न शक्यते ।

**बहुशास्त्रं समभ्यस्य बहून् वेदान् सविस्तरम् ।**
**पुंसोऽश्रुतपुराणस्य न सम्यग्याति दर्शनम्[2] ।।**

यद्यपि महर्षिणा व्यासदेवेन ब्रह्मसूत्रे योगभाष्ये महाभारते च प्रतिपाद्याध्यात्म– निष्ठाद्वारा त्रितापान्मुक्तये सरल उपायः प्रदर्शितोऽस्ति । तथापि ज्ञाननिष्ठायाः पूर्णं परिपाकस्तु पुराणेष्वेव जातोऽस्ति ।

सामान्यतया जीवनयापनाय प्रकृतेः केचिन्नियमाः सन्ति, तदनुसारं स्वाभाविकरूपेण संसारस्य सम्पूर्णाः प्राणिनः निर्वाहं कुर्वन्ति । मनुष्यः विचारप्रधानः प्राणी। अयं पशुत्वस्य निवृत्यै मनुष्यत्वस्य च जागरणाय एकस्यैतादृशनिर्दिष्टमार्गस्य आवश्यकताऽस्ति, यः केवलं मनसः प्रियविषयानां परिचयायैव सीमितं न सन् प्रत्युत् ज्ञानस्य विश्वव्यापिना आलोकेन देदीप्यमानो भवेत्, यस्मिन् पदे पदे दिव्यभावस्यालोकः, तं प्रति अग्रेसरं भवितुं प्रत्यक्षं निदर्शनं प्राप्येत् । अयमेव मार्गः सदाचारस्यास्ति, यः पाशविकप्रवृत्तीः उच्छृंखलवृत्तीश्च चूर्णं कृत्वा एकस्यामेतादृश्यां मर्यादायां

---

[1] स्कन्दपुराणे 7 / 1.24 ।

[2] पद्मपुराणे 4 / 105 / 13 ।

स्थापयति, यत्र शान्तेः आनन्दस्य चोदयो भवति । यस्य मूले दिव्यतायाः पूर्णं प्रतिष्ठास्ति ।

शास्त्राणि कथयन्ति, यत् जीवः मनुष्यशरीरं भगवतः कृपया प्राप्नोति, तस्मै अस्मिन् मानवयोनावेव तदवसरः प्राप्तोऽस्ति, यत् सः स्वभविष्यं निर्मापयेत्, यदि भोगासक्तौ पतित्वा स स्वजीवनं पशुवत्पापाचरणेन निर्वाहयति, तदा तस्मै स्वभावतः अस्यां भवाटव्यां चतुरशीतियोनौ भ्रमणं भविष्यति । पापाचरणे कृते नरकस्य प्रचण्डयातनाः भोक्तव्या, यदि शास्त्रपुराणकथनानुसारं सदाचारेण धर्मयुक्तः स्वजीवनचर्यां परिचालयति, तदा स्वकल्याणे पूर्णतः समर्थो भवति, मानवजातेरपि कल्याणं करोति । अतएव भगवान् श्रीकृष्णः भगवद्गीतायां कथयति–

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः[1] ।।**

जीवस्यकृते किं कर्तव्यम् किं न कर्तव्यमित्यस्मिन् शास्त्रमेव प्रमाणमस्ति–

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ[2] ।**

यः मनुष्यः शास्त्रपुराणविधिमुत्सृज्य स्वेच्छाचरणं करोति, तस्मै प्रचण्डनरकयातनाः भोक्तव्यं भवति, जन्ममरणस्य बन्धनं प्राप्नोति, सफलतां न प्राप्नोति, न सुखं न च परमगतिमेव प्राप्नोति ।

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्[3] ।।**

यथेच्छाचरणं मानवस्य महत्पतनमस्ति । क्षणिकः विषयसुखाय बहुजन्मपर्यन्तं दुःखे कष्टे ज्वलनं का बुद्धिमत्ताऽस्ति ? एतादृशं भयंकरं परिणामं जानन्नपि एतादृशं कर्म कथं कुर्यात् धर्मस्य पालनं शास्त्रोक्तजीवनयापनं चैवैतादृशदोषस्य सुधारोऽस्ति । पुराणेषु जीवनचर्यायाः विशदं विवेचनं प्राप्यते । जन्मतः मरणपर्यन्तं मनुष्याय किं कर्तव्यं किं न कर्तव्यमिति सर्वं विवेचितमस्ति पुराणेषु । पुराणस्य कथाः तासां मान्यताश्च मानवानां जीवने पवित्रतायाः आध्यात्मिकतायाश्च भावः जागृतमकरोत् । सामान्यतः समाजेऽपि आत्मबलस्य संजीवनी पुराणानां पवित्रकथाभिः प्राप्ताऽभवत्, इदं तथ्यमप्यवश्यमस्ति यत् कुत्रचिद् अन्धविश्वासोऽपि गृहमकरोत् ।

याः जातयः निम्नाचारस्य जीवनं व्यतीतयन्ति स्म, यासां कर्म पापमयमासीत्, तास्वपि पवित्रतायाः भावं जागृतं कृत्वा ताः आर्यं कर्तुं श्रेयः

---

[1] श्रीमद्भागवतगीता 6/5 ।
[2] तत्रैव, 16/24 ।
[3] तत्रैव 16/23 ।





पुराणकर्तुरेवास्ति । श्रीमद्भागवतपुराणे पुराणकर्त्ता एव आर्यभावं प्रदातुं सर्वशक्तिमयं विष्णुं नमस्करोति । तद्यथा–

**किरात हूणान्ध्रपुलिन्दपुल्कसा**
**आभीरकंकायवनाः खशादयः ।**
**येऽन्येऽपि पापाः तदुपाश्रयाश्रया**
**शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः[1] ।।**

भागवतपुराणस्यायं श्लोकः विष्णुपुराणे कथितस्य भारतस्य बृहत्तरसीमायाः समर्थनं करोति । तदनुसारं पूर्वे किराताः, पश्चिमे यवनाः वसन्ति । मध्यस्य जनपदेषु हूणखशादयः जातयः निवसन्ति, वैष्णवजीवनाचार सर्वान् आर्यत्वं प्रादात् । वैदिकर्षिरपि इममेव घोषणां करोति–**कृण्वन्तो विश्वमार्यम् ।**

भागवतपुराणं स्त्रीः शूद्रान् पापरताः जातीश्चापि उत्थानस्य तथ्यमुच्चैः स्वरैः अकथयत्, ब्रह्मा नारदमकथयद् यत् हरेरद्भुतचरित्रे लीनं भवितुं शिक्षां यस्मै प्राप्तमभवत्, ते–स्त्री–शूद्र–हूण–शबरादयः पापकर्मरताः जातयोऽपि देवमायायाः रहस्यं जानन्ति, संसारसमुद्रं तर्तुं मोक्षं प्राप्तुं योग्यता तेषु आयाति । भगवतः हरेः चरित्रं ये श्रृण्वन्ति, गायन्ति, अनुभवन्ति च ते पवित्रज्ञानस्याधिकारिणः सन्ति–

**ते वै विदन्त्यतितरन्ति च देवमायां**
**स्त्री–शूद्र–हूण–शबरा अपि पापजीवाः[2] ।।**
**यद्यद्भूतक्रमपरायणशीलशिक्षा–**
**स्तिर्यग्जना अपि किमु श्रुतधारणा ये[3] ।।**

भागवतस्य प्रधानचरितः प्रह्लादोऽपि भगवतः केवलं स्वोद्धारस्य वार्तां न कथयित्वा सम्पूर्णसमाजस्य सुखस्योद्धारस्य च प्रार्थनां करोति–

**प्रायेण देवमुनयः स्वविमुक्तिकामा**
**मौनं चरन्ति विजने न परार्थनिष्ठाः ।**
**नैतान् विहाय कृपणान् विमुमुक्ष एको**
**नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये[4] ।।**

लोके वैदिकधर्मेणानुप्राणितस्य पौराणिकजीवनविधेः प्रवाहेणैवाज्ञानान्धकारस्य प्रक्षालनं भवितुं शक्नोति ।

पुराणानां कथाभिः सरलतया सर्वसाधनं शीघ्रं बुद्धिगम्यं कर्तुं शक्यते । यथा यजुर्वेदस्य ईशावास्यमन्त्रे मनुष्यतायाः पूर्णविकासस्य साधनं

---

[1] भागवते 2/4/18 ।
[2] भागवते 2/46 ।
[3] भागवते 7/9/44 ।
[4] तत्रैव 7/44 ।

निर्दिष्टमस्ति, किन्तु केवलेन मन्त्रपाठेनार्थज्ञानेन वा सा भावना हृदये न जागर्ति । अतः पुराणप्रतिपादिताभिः महर्षे– र्दधीचेः राज्ञः शिवेः मोरध्वजस्य च कथाभिरुपकारभावना, सत्यवादिनो हरिश्चन्द्रस्य महाराजस्य युधिष्ठिरस्य चोपाख्यानेन सत्यनिष्ठा, दानवीरस्य बलेः कर्णस्य च कथानकेन दाननिष्ठा वसिष्ठागस्त्यच्यवनादीनां कृत्यैरद्रोहनिष्ठा, अनसूया–सतीसीता–सावित्री–मदालसा–दमयन्ती–नर्मदा–सुकन्यादीनां सतीनां पवित्राचरणैः पातिव्रत्यधर्मपरायणतायाः संचारः नरेषु नारीषु च सहसा भवति । एवं "सत्यं वद, धर्मं चर" इत्याद्युपदेशमात्रेण कश्चित्सत्यवादी धर्मात्मा वा भवितुं नार्हति । अतो वेदवाक्यबोधितामितिकर्तव्यतां पुराणेषु कथानकरूपेण मनोग्राह्यां विधातुम् ऐहलौकिकं पारलौकिकं च जीवनं सफलयितुमादेशो दत्तोऽस्ति ।

प्रधानतया पुराणेषु–सर्ग–प्रतिसर्ग–वंश–मन्वन्तर–वंशानुचरितेति पंचलक्षणमादाय मानवजीवनस्य चरमलक्ष्यभूतान् परमपुरुषार्थान् धर्मार्थकाममोक्षान् प्राप्तुमैतिहासिककथानकाधारेण प्रभावपूर्णपद्धतौ ज्ञानविज्ञानयोः विस्तारः प्रदर्शितोऽस्ति । पुराणेषु यावत् सुगमं चतुर्वर्गस्य सिद्धेः साधनमुपलभ्यते व्यासेन अष्टादशपुराणेषु सर्वेषां धर्माणां सारः परोपकारः पुण्यम्, परपीडनं महत्पापं निर्दिष्टमस्ति । अयं मानवतायाः कीदृग् महान् मौलिक आदर्शोऽस्ति । तथा चोक्तमालोचकैः–

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**
**परोपकारः पुण्याय पापाय परपीडनम् ।।**

पुराणेषु दृढनिष्ठाया अन्वेषणे मर्यादापुरुषोत्तमस्य भगवतो रामस्यादर्शचरित्रेण तस्य विशिष्टेन जीवनेन मर्यादापालनेन च महती हृदयग्राहिणी शिक्षा प्राप्यते । जनमतमादृत्य सः स्वकीयां परमप्रियां सर्वगुणसम्पन्नां सुखदुःखसहचारिणीं धर्मपत्नीं साध्वीं सतीं सीतामासन्नप्रसवामपि परितत्याज । पैतृकस्यानुशासनस्यादर्शं स्थापयितुं चक्रवर्तिसाम्राज्यपदं सहर्षं त्यक्तवान् । अत्याचारस्यान्तं कर्तुं दुराचारिणोऽधिनायकवादिनो रावणस्य च सकुलोन्मूलनं कृतवान् । यादृशो नैतिकः सामाजिकः चारित्रिकः धार्मिको व्यावहारिकश्चादर्शः रामस्य पवित्रे चरित्रे प्राप्यते, तादृशोऽखिले भूमण्डले कस्यांचिदपि सभ्यतायां नोपलभ्यते । रामराज्ये शासनव्यवस्थाया विवरणं महर्षिणा व्यासदेवेन महाभारते एवं प्रदर्शितमास्ते–

**न पुत्रमरणं केचिद्रामे राज्यं प्रशासति ।**

पद्मपुराणे तु

**यस्मिन्छासति लोकानां नाकालमरणं नृणाम् ।**
**न रोगादिपराभूतिगृहेषु च महीयसी ।**





**नेतिः कदापि दृश्येत् वैरिजं भयमेव च ।**
**वृक्षाः सदैव फलिनो मही भूयिष्ठधान्यकाः ।**
**पुत्र–पौत्र–परिवार–सनाथोकृतजीवनाः[1] ।।**

वाल्मीकिमुनिना रामायणेऽपि प्रोक्तम्–

**न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।**
**नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ।।**
**न चाग्निजं भयं किंचिन्नाप्सु मज्जन्ति जन्तवः ।**
**न वातजं भयं किंचिन्नापि ज्वरकृतं तथा ।**
**न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।**
**नगराणि च राष्ट्राणि धनधान्यसुतानि च ।**
**नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा[2] ।**

अपि च श्रीरामस्य राज्ये समये समये वृष्टिर्भवति स्म, सर्वदा सुकालो वर्तते स्म, न कदापि अकाल उपतिष्ठते स्म, सर्वा दिशः प्रसन्ना आसन् तथा नगरजनपदादयो हृष्टः पुष्टः रोगैर्मन्युभिश्च रहिताः आसन् । श्रीरामस्य शासनकाले न कस्याप्यकाले मृत्युर्भवति स्म, नापि केषांचित् प्राणिनां कश्चिद्राग उद्भवति स्म, न वा क्वचिद्रिपुत्वं जायते स्म । अर्थात् सर्वविधकुशलिनः प्रसन्नाश्च जना आसन् ।

अद्य विज्ञानस्य मध्याह्नकाले अपि नवानि विधानि प्रकाशितं भवति, विभिन्ना राजनीतिक–सामाजिक–वैज्ञानिकाः वादाः जन्म–ग्रहणं कुर्वन्ति अन्वेषणोपरान्ते तस्मिन् सर्वेषां मूलं पुराणेषु प्राप्यते । अयं अन्यत् तथ्यं अस्ति यद् अद्य तद्विधाः वादाः वा विस्तृतं रूपं धारणं अकुर्वन्, किन्तु यस्य सूत्ररूपं पुराणेषु अवश्यं प्राप्यते । अस्मात् कारणाद् अद्यापि पुराणानाम् भारतीयेषु बह्वामादरमस्ति । वर्तमाना भारतीयाः संस्कृतिः पुराणेषु एवावलम्बिता अस्ति । कालस्य प्रभावेण केचिद् वैदेशिका विद्वांसः राजनीतिकचक्रस्य भ्रमे यः कश्चिद् भारतीया विद्वांसः अपि पूर्वं पुराणेषु अरुचिं प्रदर्शितं कृतवन्तः, ते अपि सत्यस्य अन्वेषणं कर्तुम अद्य पुराणेषु भक्तिं प्रदर्शितं कुर्वन्ति । यस्य कालस्य भारतीयेतिहासस्य अन्धकारयुगं कथ्यते स्म, तस्माद् अपि पुराणानां दिव्य प्रभा एव प्रकाशं प्रसारितवान् । अद्य ऐतिहासिका विद्वांसः स्पष्टरूपेण इयं मान्यता प्रचालन्ति पुराणानि त्यक्त्वा मध्यकालीनेतिहासस्य अपि श्रृंखला न स्थापितं शक्नोति । पुराणविद्याया महत्त्वं एतत् स्पष्टं अस्ति यद् याज्ञवल्क्य–प्रभृतयः महर्षयः विद्यायाः गणनायां पुराणविद्यायाः प्रथमं स्थानं प्रदत्तवन्तः–

[1] पद्मपुराणे पातालखण्डे 5/22–23
[2] रामायणे 1/1/91–93 ।

**पुराणन्यायमीमांसाधर्मशास्त्रागमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।**

अर्थात् पुराण–न्याय–मीमांसा–धर्मशास्त्र–षड्–वेदांग–चत्वारः वेदाश्च एते चतुर्दश विद्या धर्मस्थस्य च स्मृति–सूत्र–महाभाष्य–न्यायभाष्यादिसर्वेषु प्राचीनग्रन्थेषु पुराणानाम् चर्चा प्राप्यते । वेदस्य ब्राह्मणे भागे संहिताभागे चापि पुराणस्य नाम प्राप्यते। अथर्ववेदसंहितायां द्वयोः स्थानयोः पुराणस्य नाम प्राप्यते ।

**ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।**
**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः[1] ।।**

विज्ञानस्य अस्मिन् युगे अपि यत्र यत्र अस्माकं पौराणिकविज्ञानाद् आधुनिक विज्ञानस्य संघर्षोऽभवत् । तत्र पौराणिकविज्ञानस्य एव विजयोऽभूत्। तस्य दृष्टान्तः अत्र प्रदीयते ।

वर्तमानसृष्टिः पुराण सप्तनवतिकोट्युत्तरैकार्बुदवर्षं प्राचीनं मन्यन्ते, पाश्चात्यानां धर्मग्रन्थः पंचषड्सहस्रवर्षपरिमितः कथ्यते । विज्ञानोऽपि आरम्भिकदशायां सृष्टिं बहु प्राचीनं न अमन्यत्, किन्तु क्रमशः विज्ञानस्य उन्नतिरभवत् । तथा–तथा एव नदीतटानां परीक्षा, समुद्रस्य लवणांशस्य परीक्षादिविशेषं भूस्तरविद्याया आविष्कारात् विज्ञानं सृष्टेः प्राचीनता अमन्यत्। यावत् 'रेडियम' धातुनां आविष्कारं अभवत् यत् सृष्टिः द्व्यर्बदपरिमितः अस्ति। अयं पौराणिकविज्ञानस्य महान् विजयोऽस्ति । अद्यापि वयं गर्वेण सह वक्तुं शक्नुमः यद् अधुना अपि आधुनिकं विज्ञानं तमसि एव पश्यति यत् सृष्टिः कोटिवर्षं भविष्यति । किन्तु पुराणं दिनानां संख्यापि वक्तुं समर्थः।

द्वितीयं तथ्यमस्ति यत् पुराणेषु वृक्षलताप्रभृतीनां विस्तृतं वर्णनं उद्धृतमस्ति यत् वृक्षाः पश्यन्ति, श्रृण्वन्ति, स्वादं कुर्वन्ति, जिघ्रणन्ति श्वपन्ति जागर्तिश्च । आधुनिक विज्ञाने इमे अपि विप्रतिपन्नः आसीत् । सः वृक्षलतासु जीवत्वं न मन्यन्ते स्म । किन्तु भारतमाताया एव वीरपुत्रः श्रीजगदीशचन्द्रबसुमहाभागाः आधुनिकविज्ञानस्य प्रक्रियया एव वृक्षेषु चैतन्यसत्ता जीवनस्य सूत्रं व्यापारं स्पष्टं सिद्धं अकरोत् । जगत् नतमस्तकं भूत्वा स्वीकृतम् । अयमपि पौराणिकविज्ञानस्य अद्भुतविजयोऽस्ति । एवमेव अस्माकं वेदपुराणं एतत् सर्वं सृष्टेः मूलं तत्त्वं मन्यन्ते । आधुनिकविज्ञानं पूर्वं मौलिकतत्त्वानां विस्तारं करोति स्म । अस्माकं पंचमहाभूतवादस्य हास्यं करोति स्म । किन्तु अद्य वैज्ञानिकाः अमन्यन् यत् इलेक्ट्रान–प्रोट्रानश्च द्वे एव मूल तत्त्वे स्तः । अधुना साधयन्ति यत् द्वेऽपि मूल एकैव अस्ति ।

[1] अथर्ववेदे 11/7/24 ।





**पुराणानां साम्प्रतिककाले विज्ञानोपयोगिता**

विंशशताब्दी विज्ञानस्य मध्याह्नं कथ्यते । इदानीं विज्ञानं चरमं सीमानमुपगतं श्रूयते, किन्तु अद्यत्वे यावन्ति विज्ञानानि उच्चभूमिकायामुपगतानि विद्यन्ते यावन्ति च अपूर्णानि सन्ति, तेषु एकमपि विज्ञानं एतादृशं नास्ति यस्योल्लेखो येन केनापि प्रकारेण, संस्कृत वाङ्मये न स्यात् । सम्प्रति यावन्तोऽपि आर्थिक–सामाजिक–राजनीतिकादयो वादा उपलभ्यन्ते, तेषु कस्यचित् संक्षेपेण, कस्यचन, विस्तारेण कस्यचित् पूर्वपक्षरूपेण कस्यचन च निन्दारूपेणोल्लेखस्तु संस्कृतवाङ्मये विद्यत एव ।

संस्कृतसाहित्ये पुराणेषु आध्यात्मिकाधिदैविकविषयाणां विवेचनेन सह आधिभौतिकवादस्यापि प्रचुरा सामग्री निहिता समुपलभ्यते । साम्प्रतं भौतिकपदार्थानामनुसन्धानकर्त्तारो महता परिश्रमेण कथंचित् संहारिकाया एवाणुशक्तेः अन्वेषणं कृत्वा परमाण्वस्त्रादिषु तस्या उपयोगं विधाय आत्मनो धन्यतमा मन्यमाना आश्चर्यचकितान् कुर्वन्ति समस्तान् मानवान्, परन्तु प्रजननात्मिकायाः पालनात्मिकायाश्चाणुशक्तेर्ज्ञानं नाधुना यावज्जातं तेषाम् । संस्कृतवाङ्मये तु तद्विज्ञानं प्रतिपदं प्राप्यते । यद्यत्र विषये विशेषं ध्यानं प्रदाय विशिष्टैः विद्वद्भिः सह विमर्शं विधाय समुपलभ्यमानैः सूक्ष्मयन्त्रादिभिः प्रत्यक्षीकरणाय अनुसन्धानं क्रियेत्, तर्हि अधुनापि निश्चप्रचं विश्वस्य महानुपकारो भवितुमर्हति ।

सौन्दर्यलहर्यां महाशक्तितः परमाणूनामुत्पत्तिकल्पनायां त्रिविधा प्रजनन–पालन–संहारकारिका (ब्राह्मी, वैष्णवी, रौद्री चेति) अणुशक्तयः उक्ताः सन्ति–

**तनीयांसं पांसुं तव चरणपंकेरुहभवं**
**विरचिं संचिन्वन् विरचयति लोकानविकलम् ।**
**वहत्येनं शौरिः कथमपि सहस्रेण शिरसा ।**
**हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिम्[1] ।।**

अनेन पद्येनेदं व्यज्यते यद् आकाशात्मिकाया अव्यक्तशक्तेः अणूनां वृष्टिरजायत। ततः सृजनात्मकानामणूनां संचयं कृत्वा लोकविधाता ब्रह्मा अखिलं लोकं सृजति । पालनात्मकानणून् संगृह्य लोकपालको भगवान् विष्णुः समस्तं विश्वं पालयति। संहारात्मकैश्च अणुभिः भूतभावनो भगवान् सदाशिवः संहरति सकलं संसारम्। संस्कृतवाङ्मयप्राणभूतेभ्यः पुराणेभ्यः एव अणुशक्तेः ज्ञानं प्राप्य अलौकिकज्ञानसम्पन्नो भगवानक्षपादः कणादो मुनिः स्वकीये वैशेषिकदर्शने चेष्टाहीनानां परमाणूनां परस्परं सम्पर्केण द्रव्य–गुण–कर्म–सामान्य–विशेष–समवायाभावानां सप्तानां

[1] सौन्दर्यलहरी, श्लोक 2 ।

पदार्थानामुत्पत्तिसिद्धान्तं स्थिरं कृत्वा लोकोत्तरं चमत्कारं प्रदर्शितवान् । परमाणुलक्षणं च–

**जालान्तरगते भानौ सूक्ष्मं यद् दृश्यते रजः ।**
**तस्य षष्ठतमो भागः परमाणुरिहोच्यते ।।**

दार्शनिकानां नये परमाणवो नित्या अतिसूक्ष्माश्च सन्ति । सूक्ष्मत्वादेव परमाणवो नास्माकं स्थूलदृशां मानवानां प्रत्यक्षगोचराः भवन्ति, किन्तु सर्वशक्तिमतः अघटितघटनापटीयसः परमेश्वरस्य अलौकिकशक्तिसम्पन्नानां योगिनां च परमाणूनामपि प्रत्यक्षं जायते । प्राणिनामदृष्टवशात् परमाणूनां परस्परसम्पर्केण तत्तत्कार्यमुत्पद्यते । परमाणवो द्विधा भवन्ति–कारणरूपाः कार्यरूपाश्च । तत्र कारणरूपाः परमाणवो नित्याः, अनित्याश्च कार्यरूपाः । तथा च कारणरूपाणां परमाणूनामप्रत्यक्षत्वेऽपि कार्यरूपेण परिणतानां तेषां तु प्रत्यक्षं भवत्येव ।

अत एव परमाण्वस्त्रे उपलभ्यमानाः कार्यरूपाः परमाणवो न पदार्थान्तरं भवितुमर्हन्ति, कारणभूतेषु परमाणुषु एव तेषामन्तर्भावस्वीकारान्न कोऽपि शंकापंककलंकलेशस्यावकाशः सम्भवति ।

तत्तत्पुराणेषु विविधप्रकाराणां भूगर्भगतानां धातूनाम्, पुण्यसलिलानां सरोवराणाम्, परिपूतजलानां नदीनाम्, सघनानां वनानाम् दुर्गमानां गिरीणाम्, सर्वसिद्धिदायकानां सिद्धपीठानाम् महतो मरुस्थलस्य, शस्यश्यामलस्य भूभागस्य च पर्याप्तं वर्णनं विद्यते एवं व्योमवर्तिनां ग्रहनक्षत्रादीनां दूरस्थिति–गति–शिशुमारचक्र–ध्रुव– स्थान–दक्षिणायनोत्तरायणवर्षर्तु–मास–पक्ष–दिन–घटी–पल–निमेषादीनां सूक्ष्मतमो विचारो वर्तते । येन भूगोलखगोलविषयकं प्रचुरं ज्ञानं विधाय ब्राह्मी–वैष्णवी–रौद्रीणामणुशक्तीनां विषयेऽनुसन्धानं सफलं भवितुमर्हति । यदीदानीमपि अणुवीक्षणसमितिः उपलब्धैः आधुनिकैः साधनैः अनेकप्रकाराणामणूनामन्वेषणाय पुराणमर्मज्ञैः संस्कृतरहस्यविद्भिः विशिष्टैः विद्वद्भिरेयैः सम्यक् सहयोगं विधाय प्रचुरः प्रयत्नं क्रियेत, तदा सम्भावये पुराणेतिहासकालिकं वैज्ञानिकं महत्त्वमिदानीमपि पुनः प्राप्तुं शक्यते, येन सकलस्य लोकस्य वास्तविकं कल्याणं सम्भवेत् । पौराणिकी कथा आश्रित्यैव कालिदासोदयो बहवो महाकवयोऽप्यनेकानि महाकाव्यानि नाटकादीनि च विरच्यात्मनो धन्यान् मन्यन्ते । यैश्च महानुपकारो भवति संस्कृतसाहित्यस्य वर्धते च गौरवमुत्तरोत्तरम् ।





## सन्दर्भग्रन्थाः–


1. स्कान्दपुराणम्
2. पद्मपुराणम्
3. श्रीमद्भागवतगीता 6/5 ।
4. श्रीमद्भागवतपुराणम् ।
5. श्रीमद्वाल्मीकियरामायणम्
6. अथर्ववेदः
7. सौन्दर्यलहरी



**प्रवीणचन्द्र उपाध्यायः**
अनुसन्धाता
देहलीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ परिसरस्य
लखनऊ 226010

# भगवद्भास्करप्रोक्तस्य ब्रह्मपरिणामवादस्य पर्यालोचनम्

प्रबन्धकारः- ड.-विप्लव चक्रवर्ती,

एसिस्टेन्टप्रोफेसर सरोजिनी-नाइडु-कलेज्-फर्-ओमेन् इति महाविद्यालयस्य

महर्षिणा वादरायणेन प्रणितं ब्रह्मसूत्रमाश्रित्य बहवः भाष्यग्रन्थाः विरचिताः भाष्यकारैः। ब्रह्मसूत्रस्य तेषु प्रसिद्धेषु भाष्यकारेषु भगवद्भास्करः हि अन्यतमः । वैदान्तिकः भगवद्भास्करः ज्योतिषशास्त्रज्ञस्य भास्कराचार्यस्य पूर्वपुरुषः । महाराष्ट्रस्य नासिकप्रदेशे भट्टदाजिमहोदयेन एकं ताम्रपट्टं आविष्कृतम् । तदनुसारतः वैदान्तिकः भगवद्भास्करः सिद्धान्तशिरोमणिकारस्य भास्कराचार्यस्य पूर्ववर्ती । भगवद्भास्करः नृपतेः मिहिरभोजस्य समकालीनः । मिहिरभोजः ८४० ख्रिष्टवर्षतः ८९० ख्रिष्टवर्षं यावत् राजत्वं कृतवान् । अतः ८४० ख्रिष्टवर्षतः ८९० ख्रिष्टवर्षस्य मध्यवर्तिनि समये भगवद्भास्करः वर्तमानः आसीत् ।

साधारणतः कार्यकारणतत्त्वस्य वर्णनकाले वेदान्तिनः विशेषतः अद्वैतवेदान्तिनः विवर्तवादं स्वीकुर्वन्ति । किन्तु भगवद्भास्करः परिणामवादं स्वीकरोति । ननु परिणामवदस्य बहवः समालोचकाः वेदान्तपरिमण्डले विशेषप्रतापेन सह विराजन्ते, तथापि कथं भगवद्भास्करः ब्रह्मपरिणामवादं स्वीचकार । अत्रोच्यते ब्रह्मोपासनायाः अधिकारिणः प्रति करुणापरवशः सन्नेव उपास्यब्रह्मणः सगुणस्वरूपं निर्देशयितुं ब्रह्मसूत्रसमूहस्य तात्पर्यं सगुणब्रह्मपक्षे वर्णयामास भगवद्भास्करः । वस्तुतः ज्ञानकर्मणोः समुच्चयात् मोक्षप्राप्तिरिति भगवद्भास्करस्य मतम् -"अत्र हि ज्ञानकर्मसमुच्चयान्मोक्षप्राप्तिः सूत्रकारस्याभिमतम्"[१] इति । कदापि धर्मजिज्ञासायाः पूर्वं ब्रह्मजिज्ञासा न सम्भवति - 'तस्मात्पूर्ववृत्ताद्धर्मज्ञानादनन्तरं ब्रह्मजिज्ञासेति युक्तम्'[२] इति । अपि च तन्मते जीवब्रह्मणोः भेदस्तथा अभेदः सिद्ध्यति । तदुक्तं तेन - 'अतो भिन्नाभिन्नरूपं ब्रह्मेति स्थितम्' इति । किं बहुना विषयनिर्णयावसरे भगवद्भास्करेण उक्तं भेदाभेदः एव विषयः । भास्करमते हि ब्रह्म आप्यम् । अविद्यायाः निवृत्तौ एव ब्रह्मप्राप्तिः स्यात् । तन्नये उत्पाद्यं, विकार्यं तथा संस्कार्यमित्येतेषां कर्मणामभावे सत्यपि आप्यकर्म तत्र सम्भवति । तदुक्तं तेन - 'सत्यं त्रिविधं कर्म न सम्भवतीत्याप्यं तु न शक्यते निरसयितुम् ।' इति । आचार्यस्य शङ्करस्य नये ज्ञानेन अज्ञाननिवृत्तिः, अज्ञाननिवृत्तेः च मोक्षः सिद्ध्यति । किन्तु भगवद्भास्करमते कर्मसहितेन ज्ञानेन ब्रह्मप्राप्तिर्भवति इत्यतः ब्रह्म आप्यमिति ।

ब्रह्मसूत्रसमूहस्य तात्पर्यं सगुणब्रह्मपक्षे वर्णनकाले भगवद्भास्करः निर्गुणब्रह्मपक्षं खण्डितवान् । किन्तु यदिदं निर्गुणब्रह्मपक्षस्य खण्डनं तत्तु निर्गुणब्रह्मतत्त्वे





अनधिकारिणां निवृत्त्यर्थमेव । यथा आपस्तम्भः धर्मसूत्रेऽनधिकारिणां पुरुषाणां निवृत्त्यर्थं चतुर्थाश्रमस्य सन्न्यासाश्रमस्य वा निन्दां कृतवान् । एवमेव भर्तृप्रपञ्चप्रभृतयः आचार्याः जगतः सत्यत्वप्रतिपादनाय बृहदारण्यकभाष्ये ब्रह्मणः द्वैताद्वैतरूपं प्रतिपादितवान् । अत्र एतदपि ज्ञेयं यत् निर्गुणब्रह्मवत् शङ्कराचार्यसम्मतस्य निरास्वादमोक्षस्यापि निःसम्बन्धमोक्षस्य वा समालोचनं कृतं भगवद्भास्करेण । तथाहि तेनोक्तं - 'निःसम्बन्धा निःस्वादस्तत्पक्षे मोक्षः स्यात्, चैतन्यमात्रविशेषात् । वदन्ति केचित् शृगालत्वं वने वरम्' इति । शृगालत्वं हि प्रशस्यं न तु निरास्वादमोक्षः इति भगवद्भास्करमतम् ।

वस्तुतः आचार्यस्य भगवद्भास्करस्य मते देहपातात् परमेव देहादौ आत्मबुद्धेः निवृत्तौ सर्वज्ञत्वादियुक्तमोक्षः लभते । तत्रभवतोक्तम् - "अस्मत्पक्षे तु न भेदज्ञाननिवृत्तिर-विद्यानिवृत्तिः, किं तर्हि शरीरादावनात्मन्यात्मबुद्धिनिवृत्तिः तत्र च सिद्धौ हेतुस्तन्निवृत्तौ शरीरपातादनन्तरं सर्वज्ञः सर्वशक्तिर्निरतशयसुखसंवेदौ मुक्तो भवतीति निरवद्यम्"[३] । तत्रभवतां नये यतः भेदाभेदः एव विषयः अतः ब्रह्म एव कार्यरूपे भिन्नं तथा अभिन्नम् । इदं भेदाभेदज्ञानमेव पुरुषार्थः । मुक्तपुरुष एव सर्वात्मरूपः भवति ।

आचार्यः भगवद्भास्करः परिणामवादी । तत्र भवतां मते ब्रह्म एव जगतः निमित्तकारणं तथा उपादानकारणम् । यथा ऊर्णनाभी निजशरीरतः जालं विस्तारयति तथा निजशरीरे एव लयं प्रापयति तद्वत् ब्रह्मतः एव जगतः परिणामः जायते । आचार्यः भगवद्भास्करः एकं सूत्रमुल्लिखितवान् यस्य उल्लेखः अन्यत्र नास्ति । तत् सूत्रं हि - "अस्थुलमनण्वह्रस्वद- दीर्घमशब्दस्पर्शमरूपमव्ययम्" इति । अस्य सूत्रस्य भाष्ये भगवद्भास्करः लिखति - "आकाशो वै नामरूपयोर्निर्वहिता ते यदान्तराद् ब्रह्माद्व्योऽमूर्त्तः पुरुषः स बाह्यन्तरो ह्यजः । तदेतद् ब्रह्मापूर्वमनपरमनन्तरमवाह्यं परमात्मा ब्रह्म सर्वानभूरित्येवमादीनां वाक्यानां सृष्टिप्रकारस्याप्यरूपवद् ब्रह्मप्रतिपादने तात्पर्यम् ।" इति । आचार्यभगवद्भास्करमते ब्रह्म एव जीवरूपेण परिणमते । जीवो ब्रह्मणः अंशः । ब्रह्मणः भोक्तृशक्तिर्हि चेतना । सा भोक्तृशक्तिरेव जीवः ।

ब्रह्मपरिणामवादस्य समर्थकरूपेण संक्षेपशारीरककारस्य नाम अपि आयाति । तत्रभवता उक्तम् - आरम्भवादं, सङ्घातवादं, परिणामवादं तथा विवर्तवादं समाश्रित्य वादिनः स्वमतानि प्रकाशयन्ति । संक्षेपशारीरककारस्य मते ब्रह्मसुत्रकारः आरम्भवादं तथा सङ्घातवादं परित्यज्य परिणामवादं तथा विवर्तवादं स्वीयसिद्धान्तरूपेण स्वीचकार । तदुक्तं संक्षेपशारीरकभाष्ये -

आरम्भ-संहति-विकार-विवर्तवादानाश्रित्य वादिजनता खलु वावदीति ।

आरम्भ-संहतिमते परित्यज्य वादौ द्वावत्र संग्रहपदं नयते मुनीन्द्रः[४] ॥ इति ।

ब्रह्मसूत्रकारोऽपि विवर्तपरिणामयोः मध्ये प्रथमतः परिणामं स्वीकृत्य सूत्रं चकार - "भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्"[५] इति । जगतः ब्रह्मपरिणामत्वे या आपात्तयः स्युः तासां परिहारोऽपि ब्रह्मसूत्रकारेण प्रदर्शितः । परिणामबादस्य अवलम्बने सूत्रकारस्य अयमभिप्रायः यत् व्यवहारस्य रक्षार्थं तथा कर्मकाण्डस्य उपयोगितया परिणामवादस्य उपयोगः अस्ति । सुत्रकारस्याभिप्रायं प्रकटयता संक्षेपशारीरककारः उक्तवान् - "तत्रापि पूर्वमुपगम्य विकारवादं भोक्त्रादिसूत्रमवतार्य विरोधनुत्यै । प्रावर्त्तत व्यवहृतेः परिरक्षणाय कर्मादिगोचरविधावुपयोगहेतोः " इति ।

भगवद्भास्करोक्तस्य ब्रह्मपरिणामवादस्य खण्डनाय कल्पतरुटीकायाम् अमलानन्दः उक्तवान् - "भास्करस्तु इह बभ्राम, योनिरिति परिणामादिति च सूत्रनिर्देशात् छान्दोग्यवाक्यकारेण ब्रह्मानन्दादिना परिणामस्तु स्यादित्यभिधानाच्च परिणामवादो ब्रह्मसम्मत इति, तं प्रतिबोधयति - इयञ्जेति" इति । भामतीकारेणापि भगवद्भास्करमतं पर्यालोचयतोक्तम्- 'इयञ्चोपादानपरिणामादिभाषा न विकाराभिप्रायेण, अपि तु यथा सर्पस्योपादानं रज्जुः एवं ब्रह्म जगदुपादनं द्रष्टव्यम् । न खलु नित्यस्य निष्कलस्य ब्रह्मणः सर्वात्मना एकदेशेन वा परिणामः सम्भवति ।"[६] इति ।

ननु एवं बलबान् विरोधः अस्तीति कथं भगवद्भास्करः परिणामवादं स्वीकृतवान् इति चेदुच्यते विवर्तवादापेक्षया परिणामवादस्य बोधः साधारणानां जनानां सरलतया जायते इत्यतः परिणामवादं वर्णनयामास भगवद्भास्करः । अपि च परिणामवादज्ञानपूर्वकः एव विवर्तवादप्रवेशः सम्भवतीति भगवद्भास्करेण परिणामवादस्य समाश्रयणं साधितमिति । संक्षेपशारीरकारोऽपि मतस्यास्य समर्थनं कृतवान् । तदुक्तं तत्रभवता "साक्षादिहाभिमतमेव विवर्तवादमाहत्य सूत्रयति पूर्वमपेक्षमाणः । आरम्भणादिवचनेन विवर्तवादं शक्नोति वक्तुमुदिते परिणामवादे"[७] इति ।

परिणामवादस्य स्वीकारेण प्रत्यक्षविरोधोऽपि न भवति । पुनश्च ब्रह्मपरिणामवादे उपादानभूतस्य ब्रह्मणः अद्वैत्वमपि उपपाद्यते । अतः ब्रह्मसूत्रकारेणापि परिणामवादं स्वीकृतमिति । मानवः कस्यचिदुच्चतरस्य प्रासादस्य शिखरं गमनाय सोपानानि व्यवहरति । ततः क्रमेण प्रासादशिखरम् आरोहति । किन्तु नीचस्थेषु सोपानेषु पदस्थापनं विना प्रासादारोहणं न सम्भवति तद्वत् शास्त्रेषु शास्त्रकाराः सूक्ष्तत्त्वप्रतिपादनाय स्थूलतत्त्वानां वर्णनं कृतवन्तः । तदर्थमेव ब्रह्मसूत्रकारः आदौ परिणामवादरूपस्य स्थूलतत्त्वस्य वर्णनादनन्तरं विवर्तरूपस्य सूक्ष्मतत्त्वस्य प्रतिपादानं कृतवानिति । परिणामवादे भेदस्य प्रसक्तिः अस्ति तथा विवर्ते प्रस्क्तभेदस्य निषेधः





अस्ति । अतः भेदप्रसञ्जकस्य परिणामवादस्य विवर्तवादपूर्वभावित्वं युक्तमेव । अतः संक्षेपशारीरककारेण उक्तम् -

"आरुह्य भूमिमधरामितराधिरोढुं शक्यते शास्त्रमपि कारणकार्यभावम् ।

उक्त्वा पुरा परिणतिप्रतिपादने सम्प्रत्यपोहति विकारमृषात्वसिद्ध्यै ॥"[८] इति ।

यद्यपि वेदान्ते परिणामवादस्य तथा विवर्तवादस्य उभयोः ग्रहणं विहितं तथापि परिणामवादः विवर्तवादस्य पूर्वभूमिस्वरूपः । अधिकारी पुरुषः परिणामवादे व्यवस्थितः भवति चेत् विवर्तवादः स्वतः एव समागतः भवति । अतः संक्षेपशारीरककारेण उक्तम् -

"विवर्तवादस्य हि पूर्वभूमिर्वेदान्तवादे परिणामवादः ।

व्यवस्थितेऽस्मिन् परिणामवादे स्वयं समायाति विवर्तवादः ॥"[९] इति ।

यस्य प्रपञ्चवासितबुद्धिः, तस्य समीपं जगत् ब्रह्मपरिणामरूपेण प्रतिभातं भवति । पुनश्च संसारविरक्तस्य पुरुषस्य समीपं जगत् ब्रह्मविवर्तरूपेण प्रतिभातं भवति । ये खलु परिपक्वश्रवणादिद्वारा स्थिरबुद्धयः तेषां समीपं जगत् परिणामरूपेण विवर्तरूपेण वा प्रतिभातं न भवति । ते तु शुद्धं परमात्मानमेव पश्यन्ति । अत्र तु संक्षेपशारीरककारोऽपि मतसाम्यं भजते । अतः संक्षेपशारीरककारेण उक्तम् -

"कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम् ।

स्थिरमतिः पुरुषः पुनरीक्षते व्यपगतद्वितयं परमं पदम् ॥"[१०] इति ।

यथा फललाभस्य कृते मानुषः पूर्वम् उपायस्य अनुष्ठानं करोति, श्रुतिः तथा सूत्रकारस्य तादृशस्य उपायस्य विवर्तसिद्धये उपायपरिणामं पूर्वं प्रदर्शितवान् । अत्रापि संक्षेपशारीरककारः मतसाम्यं भजते । अतः संक्षेपशारीरककारेण उक्तम् - उपायमातिष्ठति पूर्वमुच्चरूपेयमाप्तुम् जनता यथैव । श्रुतिर्मुनीन्द्रश्च विवर्तसिद्धौ विकारवादं वदतस्तथैव "[११]

इति । अतः एतत्सर्वं विचार्य निश्चप्रचमेव वक्तुं शक्यते भगवद्भास्करस्य परिणामवादः हि वेदान्तपरिसरे अनेकेषामेव भाष्यटीकाकाराणां सम्मतमिति शम् ।

पादटीकाः

१) भगवद्भास्करप्रणीतस्य ब्रह्मसूत्रभाषस्य अधिकारिनिरूपणम्

२) तत्रैव

३) तत्रैव विषयनिरूपणम्
४) संक्षेपशारीरकभाष्यम् - २/५७
५) ब्रह्मसूत्रम् - २/१/१३
६) २/१/३-ब्रह्मसुत्रस्य कल्पतरुटीका
७) संक्षेपशारीरकभाष्यम् - २/५९
८) तत्रैव - २/६०
९) तत्रैव - २/६१
१०)तत्रैव २/८९
११) तत्रव २/६२

सहायकग्रन्थसूची

१) वादरायणप्रणीतम्, वेदान्तदर्शनम्, द्वितीयः अध्यायः, अनुवादकः व्याख्याता च स्वामी विश्वरूपानन्दः, उद्बोधन कार्यालय, कोलकाता, २०१४ ।
२) श्रीयोगेन्द्रनाथ तर्क सांख्यवेदान्ततीर्थ विरचित, भारतीय दर्शनशास्त्रेर समन्वय, कलिकाता विश्वविद्यालय, २०१३ ।
३) भगवद्भास्करविरचितम्, ब्रह्मसूत्रभाष्यम्, सम्पादकः -विन्ध्येश्वर-प्रसाद-द्विवेदी, चौखम्बा, संस्कृत सिरिज, वाराणसी, १९१५ ।
४) प्रज्ञानन्दस्वरस्वती विरचित, वेदान्तदर्शनेर इतिहास, सम्पादक - राजेन्द्रनाथ घोष, प्रथम भाग, प्रज्ञानन्द टास्ट, द्वितीय मुद्रण, १३७१ (बङ्गाब्द) ।





## *THE SCIENCE OF HOUSE BUILDING ARCHITECHTURE AS REFLECTED IN BṚHATSAṀHITĀ*

Dr. Dharmendra Das
Assistant Professor
Department of Sanskrit
Utkal University, Bhubaneswar-751004
E-mail ID: das.dharmendra0@gmail.com

**ABSTRACT**

This paper discusses the ancient house building architecture which has been reflected in the text of *Bṛhatsaṁhitā*. The Text Bṛhatsaṁhitā is verily allied with the *Vedas or the* knowledge of treasury. In the convention of knowledge, there are also four *Upavedas-Dhanurveda, Stāpatyaveda, Gāndharvaveda and Āyurveda. Upavedas* are actually known as the practical knowledge of science. These *Upavedas* are basically designed on scientific work. There are so many literatures which have been collected by our ancient seers. *Śrīvarāhamihira is* the most competent personality in the ancient science of knowledge. He has written the text of *Bṛhatsaṁhitā*. This is treated as the practical literature in the language of Sanskrit. The Fifty three chapter of this text is named as *Vāstuvidyā* or the science of house building.

**KEY WORDS:** *Bṛhatsaṁhitā, Upavedas, Stāpatyaveda, Vāstuvidyā , Śrīvarāhamihira.*

### 0.0 INTRODUCTION

Study of Sanskrit Language and literature is well recognized as a curriculum of both Indian and International Universities in the 21st century. Wisdom of Sanskrit language is not achievable without taking the help of Technical Literature. In the Science of house building the technical literature *Bṛhatsaṁhitā*, is incredible. *Vāstuśilpa* or the science of house-building is very ancient in India. The word *Vāstu* is a sanskrit word which is derived from the root *Vas nivāse* with the suffix *tun*. So, *Vāstu* means a suitable place to reside or a house in general. Our ancient texts of knowledge are composed in such a way for peaceful living of mankind. The *Bṛhatsaṁhitā* stands a vital role in spreading the scientific knowledge throughout the World. There are *Upavedas* of each *Vedas*.

The house building architecture is treated as *Vāstuśilpa* in Sanskrit. This science of house building is glorified by the ancient Indian author like *Vrāhamihira* who has written the text of *Bṛhatsaṁhitā*. There are one hundred and six chapters with scientific data in this text. The Chapter LIII is basically emphasized on the ancient technique adopted in a scientific manner. Different type of house buildings is discussed in this chapter. The present study is analyzing ten categories of houses.

**1.0 THE NATURE AND SCOPE OF THE PRESENT STUDY**

*Bṛhatsaṁhitā* is a text of ancient Indian science and technology. The 412 B.C.is attested by Historian as the time of *Śrīvarāhamihir* the author of this text. The ancient house building architecture is very scientific. The technical calculation of width, length and height of the various houses are presented in a simplified way. Basically, the houses of government officials are presenting a clear picture of ancient architecture. The nature of this study is to remove the gap between ancient and modern science of technology. Moreover, the 21st century is expecting to carry on more research on ancient Indian science and technology. To glorify our ancient Indian scriptures, this kind of study is a primary attempt. No doubt, there is also scope for further study on the text of *Bṛhatsaṁhitā*.

**1.1 PURPOSE OF THE PRESENT STUDY**

- To create awareness about the need for exploring ancient Indian scientific philosophies.
- To resurrect the lost faith in our scientific culture and heritage.
- To explore and imbibe new ways and means to overcome of excessive exploitation of Mother Nature armed with power of modern science and technology.
- To propagate the ethos of our ancient science and technology.
- To encourage researchers to carry out research in ancient Indian science and technology.

**1.2 THE KING'S PALACE**

The king's palace is coming under the first category of the house. The author has told five kinds of king's palace on the basis of measurement.[i] The best of them is 108 cubits in width. The house building of 108 cubits in width is the type one. The width of the second type will be less of 8 cubits from first one. That will be: 108-8=100 cubits. Similarly, the width of third type: 100-8=92 cubits. The width of the fourth type: 92-8=84 cubits. The width of the fifth type: 84-





8=76cubits. Their length is greater than the breadth by a quarter. The following table is presenting the detail calculation of breadth and length of King's palace.

***Table-A***

| House | Breadth in cubits | Length in cubits |
|---|---|---|
| Type-I | 108 | 108/4+108=135 |
| Type-II | 108-8=100 | 100/4+100=125 |
| Type-III | 100-8=92 | 92/4+92=115 |
| Type-IV | 92-8=84 | 84/4+84=105 |
| Type-V | 84-8=76 | 76/4+76=95 |

**2.0 THE HOUSE OF COMMANDER-IN-CHIEF**

The second category of house building is nothing but the Commander-in-chief.[ii] *Senāpti* is a Sanskrit word which means the Commander -in-chief. The house of this kind is also divided into five types. According to *Śrivarāhamihira*, the width of the first type is 64 cubits. The width of the second type will be less of 6 cubits from first one. That will be: 64-6=58 cubits. Similarly, the width of third type: 58-6=52 cubits. The width of the fourth type: 52-6=46 cubits. The width of the fifth type: 46-6=40cubits. So, the five kinds of houses of a commander-in-chief are in order 64, 58, 52, 46 and 40 cubits in width, and their length exceeds the width by a sixth. The following table is representing the detail calculation of breadth and length of the house of the Commander in chief.

***Table-B***

| House | Breadth in cubits | Length in cubits |
|---|---|---|
| Type-I | 64 | 64/6+64= 74 |
| Type-II | 64-6=58 | 58/6+58=67 |
| Type-III | 58-6=52 | 52/6+52=60 |
| Type-IV | 52-6=46 | 46/6+46= 53 |
| Type-V | 46-6=40 | 40/6+40= 46 |

### 3.0 THE HOUSE OF MINISTER AND QUEEN

This is the third category of house building described in *Bṛhatsaṁhitā*. The author has mentioned the measurement technique of two persons.[iii] They are namely the minister and the queen. Like the King's house, the ministers' house is divided into five types. According to *Śrivarāhamihira*, the width of the first type is 60 cubits. The width of the second type is 4 cubits less than the first one. So, the width of the second type house of a minister will be 56 cubits. Accordingly, the width of the third type: 56-4=52cubits. The width of the fourth type: 52-4=48cubits. And the width of the fifth type: 48-4=44cubits. Therefore, the houses of ministers are 60,56,52,48 and 44 cubits in width. Their length exceeds their breadth by an eight. The following table is representing the detail calculation of breadth and length of the house of Minister.

***Table-C***

| House | Width in cubits | Length in cubits |
|---|---|---|
| Type-I | 60 | 60/8+60=67 |
| Type-II | 60-4=56 | 56/8+56=64 |
| Type-III | 56-4=52 | 52/8+52=58 |
| Type-IV | 52-4=48 | 48/8+48=54 |
| Type-V | 48-4=44 | 44/8+44=49 |

The houses of queens have half the dimensions of the minister's houses. The width of first type house of queen will be half of 60 cubits. It is 60/2=30 cubits. At the same time, the width of the second type is 28 cubits. It is 30-2=28 cubits. The width of the second type is 2 cubits less than the first type. So, the width of the third type, fourth type and fifth type are 26 cubits, 24 cubits and 22 cubits respectively. Their length exceeds their breadth by an eighth. The following table is representing the detail calculation of breadth and length of the house of Queen.

***Table-D***

| House | Width in cubits | Length in cubits |
|---|---|---|
| Type-I | 60/2=30 | 30/8+30=33 |
| Type-II | 56/2=28 | 28/8+28=31 |
| Type-III | 52/2=26 | 26/8+26=29 |
| Type-IV | 48/2=24 | 24/8+24=27 |





| | | |
|---|---|---|
| Type-V | 44/2=22 | 22/8+22=24 |

### 4.0 THE HOUSE OF *YUVARĀJA*

The author is discussing the house building measurement of princes and younger princes as well. There are five types of houses.[iv] The width of the *Yuvarāja*'s house should be 80,74,68,62 and 56 cubits respectively and their length exceeds the breadth by a third. The table-1 is representing the detail measurement of the houses of the Princes.

**Table-1**

| House | Width in cubits | Length in cubits |
|---|---|---|
| Type-I | 80 | 80/3+80=106 |
| Type-II | 80-6=74 | 74/3+74=98 |
| Type-III | 74-6=68 | 68/3+68=90 |
| Type-IV | 68-6=62 | 62/3+62=82 |
| Type-V | 62-6=56 | 56/3+56=74 |

According to the text of *Bṛhatsaṁhitā*, the dimensions of the houses of the younger princes should be half those of the *Yuvarāja*'s. The discrimination between the elder and younger brother is highly maintained. In Sanskrit *Yuvarāja* is the elder one. *Anuja* means the younger brother. After coronation, the elder brother will be treated as the *Yuvarāja* or the Prince. The detail measurements of the houses of younger princes are reflected in the Table-2.

**Table-2**

| House | Width in cubits | Length in cubits |
|---|---|---|
| Type-I | 80/2=40 | 40/3+40=53 |
| Type-II | 74/2=37 | 37/3+37=49 |
| Type-III | 68/2=34 | 34/3+34=45 |
| Type-IV | 62/2=31 | 31/3+31=41 |
| Type-V | 56/2=28 | 28/3+28=37 |

**5.0 THE HOUSES OF FEUDATORY CHIEFS AND KING'S OFFICERS**

The dimensions of the houses of feudatory chiefs, nobles and king's officers would be equal to the difference between the measurements of king's houses and those of the minister's.[v]

***Table A1***

***(Calculation of Breadth of the houses of feudatory chiefs, nobles and king's officers in cubits)***

| House | Breadth of Kings' house in cubits | Breadth of Ministers' house in cubits | Differences in cubits | Breadth of the houses of feudatory chiefs, nobles and king's officers in cubits |
|---|---|---|---|---|
| Type-I | 108 | 60 | 48 | 48 |
| Type-II | 100 | 56 | 44 | 44 |
| Type-III | 92 | 52 | 40 | 40 |
| Type-IV | 84 | 48 | 36 | 36 |
| Type-V | 76 | 44 | 32 | 32 |

***Table-B1***

***(Calculation of Length of the houses of feudatory chiefs, nobles and king's officers in cubits)***

| House | Length of Kings' house in cubits | Length of Ministers' house in cubits | Differences in cubits | Length of the houses of feudatory chiefs, nobles and king's officers in cubits |
|---|---|---|---|---|
| Type-I | 135 | 67 | 68 | 68 |
| Type-II | 125 | 64 | 61 | 61 |
| Type-III | 115 | 58 | 57 | 57 |
| Type-IV | 105 | 54 | 51 | 51 |
| Type-V | 95 | 49 | 46 | 46 |





***Table-C 1***

***(The width and length of the houses of feudatory chiefs, nobles and king's officers in cubits)***

| House | Width in cubits | Length in cubits |
|---|---|---|
| Type-I | 48 | 68 |
| Type-II | 44 | 61 |
| Type-III | 40 | 57 |
| Type-IV | 36 | 51 |
| Type-V | 32 | 46 |

**6.0 THE HOUSES OF CHAMBERLAINS, COURTESANS AND ARTISTES**

Similarly the dimensions of the houses of chamberlains, courtesans and artistes would be equal to the difference between the measurements of the houses of the king and the *Yuvarāja.*[vi]

***Table-A 2***

***(Calculation of the Breadth of the houses of chamberlains, courtesans and artistes in cubits)***

| **House** | **Breadth of Kings' house in cubits** | **Breadth of *Yuvarāja*s' house in cubits** | **Differences in cubits** | **Breadth of the houses of chamberlains, courtesans and artistes in cubits** |
|---|---|---|---|---|
| Type-I | 108 | 80 | 28 | 28 |
| Type-II | 100 | 74 | 26 | 26 |
| Type-III | 92 | 68 | 24 | 24 |
| Type-IV | 84 | 62 | 22 | 22 |
| Type-V | 76 | 56 | 20 | 20 |

***Table-B 2***

***(Calculation of the length of the houses of chamberlains, courtesans and artistes in cubits)***

| **House** | **Length of Kings' house in cubits** | **Length of Yuvarājas' house in cubits** | **Differences in cubits** | **Length of the houses of chamberlains, courtesans and artistes in cubits** |
|---|---|---|---|---|
| Type-I | 135 | 106 | 29 | 29 |
| Type-II | 125 | 98 | 27 | 27 |
| Type-III | 115 | 90 | 25 | 25 |
| Type-IV | 105 | 82 | 23 | 23 |
| Type-V | 95 | 74 | 21 | 21 |

## 7.0 THE HOUSES OF DIRECTORS AND OFFICERS

The houses of all directors and officers (of stables, elephant yards, dairies, royal kitchen etc.) should be of the dimensions of treasure house and pleasure mansions.[vii] The dimensions of the treasury and pleasure-mansion would be equal to the difference between those of the royal palace and the commander-in-chief's house.[viii]

***Table-1***

| House | Breadth of Kings' house in cubits | Breadth of commander-in-chief's house in cubits | Differences in cubits | Breadth of treasure house and pleasure mansions | **Breadth of the houses of all directors and officers** |
|---|---|---|---|---|---|
| Type-I | 108 | 64 | 108-64=44 | 44 | 44 |
| Type-II | 100 | 58 | 100-58=42 | 42 | 42 |
| Type-III | 92 | 52 | 92-52=40 | 40 | 40 |
| Type-IV | 84 | 46 | 84-46=38 | 38 | 38 |
| Type-V | 76 | 40 | 76-40=36 | 36 | 36 |





***Table-2***

| House | Length of Kings' house in cubits | Length of commander-in-chief's house in cubits | Differences in cubits | Length of treasure house and pleasure mansions | **Length of the houses of all directors and officers** |
|---|---|---|---|---|---|
| Type-I | 135 | 74 | 135-74=61 | 61 | 61 |
| Type-II | 125 | 67 | 125-67=58 | 58 | 58 |
| Type-III | 115 | 60 | 115-60=55 | 55 | 55 |
| Type-IV | 105 | 53 | 105-53=52 | 52 | 52 |
| Type-V | 95 | 46 | 95-46=49 | 49 | 49 |

The difference between the measurements of the houses of *Yuvarāja* and minister would give those of the houses of heads of industrial workshops and envoys.

***Table-3***

| House | Breadth of *Yuvarājas*' house in cubits | Breadth of Minister's house in cubits | Differences in cubits | **Breadth of the houses of heads of industrial workshops and envoys** |
|---|---|---|---|---|
| Type-I | 80 | 60 | 80-60=20 | 20 |
| Type-II | 74 | 56 | 74-56=18 | 18 |
| Type-III | 68 | 52 | 68-52=16 | 16 |
| Type-IV | 62 | 48 | 62-48=14 | 14 |
| Type-V | 56 | 44 | 56-44=12 | 12 |

***Table-4***

| House | Length of *Yuvarājas*' house in cubits | Length of Minister's house in cubits | Differences in cubits | **Length of the houses of heads of industrial workshops and envoys** |
|---|---|---|---|---|
| Type-I | 106 | 67 | 106-67=39 | 39 |
| Type-II | 98 | 64 | 98-64=34 | 34 |
| Type-III | 90 | 58 | 90-58=32 | 32 |
| Type-IV | 82 | 54 | 82-54=28 | 28 |
| Type-V | 74 | 49 | 74-49=25 | 25 |

**8.0 THE HOUSES OF ROYAL ASTROLOGER, PRECEPTOR AND PHYSICIAN**

The five varieties of houses of royal astrologers, preceptors and physicians should measure 40,36,32,28 and 24 cubits in breadth, and their length should exceed the breadth by sixth.[ix]

The detail calculation of breadth and length of the house of royal astrologers, preceptors and physicians is presented in the following table.

***Table-A***

| **House** | **Breadth in cubits** | **Length in cubits** |
|---|---|---|
| Type-I | 40 | 40/6+40=46 |
| Type-II | 40-4=36 | 36/6+36=42 |
| Type-III | 36-4=32 | 32/6+32=37 |
| Type-IV | 32-4=28 | 28/6+28=32 |
| Type-V | 28-4=24 | 24/6+24=28 |

There length would be in order 46, 42, 37, 32 and 28 cubits.

**9.0 THE DIMENSIONS OF HOUSES FOR THE DIFFERENT CLASSES OF VARṆAS**

The width of the houses of *Brāhmaṇas* and other four classes ranges from 32 cubits to 16 cubits, each being reduced by 4 cubits; i.e *Brāhmaṅas* have houses with 32 cubits and below; *Kṣatriyas* have four with 28 cubits, 24, 20 and 16 cubits for their width; *Vaiśyas*,





three with 24, 20 and 16 cubits; and *Śvapākas*) will have houses with much smaller dimensions than these. The length of the houses for the four classes should exceed the breadth by a tenth, eight, sixth and fourth respectively.[x]

***Table-1 (Breadth of the Houses of Brāhmaṇ , Kṣatriya, Vaiśya and Śudra in cubits)***

| H | B | K | V | S |
|---|---|---|---|---|
| T-1 | 32 | 28 | 24 | 20 |
| T-2 | 28 | 24 | 20 | 16 |
| T-3 | 24 | 20 | 16 | |
| T-4 | 20 | 16 | | |
| T-5 | 16 | | | |

***Table-1 (Length of the Houses of Brāhmaṇ , Kṣatriya, Vaiśya and Śudra in cubits)***

| H | B | K | V | S |
|---|---|---|---|---|
| T-1 | 32/10+32=35 | 28/8+28=31 | 24/6+24=28 | 20/4+20=25 |
| T-2 | 28/10+28=30 | 24/8+24=27 | 20/6+20=23 | 16/4+16=20 |
| T-3 | 24/10+24=26 | 20/8+20=22 | 16/6+16=18 | |
| T-4 | 20/10+20=22 | 16/8+16=18 | | |
| T-5 | 16/10+16=17 | | | |

(H=House, T=Type, B= *Brāhmṅa*, K= *Kṣatriya, V=Vaiśya , S =Śudra)*

In the above analysis's, it is very clear that the *Brāhamṇa* was allowed to build five type of houses in the society. He had the highest reputation in the society. Kṣatriya was allowed to stay within four types of houses. The *Vaiśya* and the *Śudra* were allowed to stay within three and two types of houses respectively. In this context, there is one more thing which is not forgotten by the author of *Bṛhatsaṁhitā* to talk about the houses of the people of law standard. The *Cāṇḍālas* and the *Śvapākas* are treated as law standard in the society. The houses of this category of people have much smaller dimensions than *Śudra.* They are allowed to stay within one type of house.

**10.0 THE MEASUREMENT OF THE TREASURY AND PLEASURE MANSION**

The dimensions of the treasury and pleasure-mansion would be equal to the difference between those of the royal palace and the commander-in-chief's house. [xi]

***Table -A (Calculation of Breadth of treasure house and pleasure mansions)***

| House | Breadth of Kings' house in cubits | Breadth of commander-in-chief's house in cubits | Differences in cubits | **Breadth of treasure house and pleasure mansions** |
|---|---|---|---|---|
| Type-I | 108 | 64 | 108-64=44 | 44 |
| Type-II | 100 | 58 | 100-58=42 | 42 |
| Type-III | 92 | 52 | 92-52=40 | 40 |
| Type-IV | 84 | 46 | 84-46=38 | 38 |
| Type-V | 76 | 40 | 76-40=36 | 36 |

